


परम पूज्य तपश्चर्या–चक्रवर्ती पट्टाधीशाचार्यश्री

# सुविधिसागर जी महाराज

के

50 वें जन्मदिवस के पावन अवसर पर

सुविधि–परिवार के द्वारा आयोजित

## जिनवाणी-महोत्सव

# सहस्रग्रन्थसंग्रह

* जन्मदिवस 19–03–1971 * मुनिदीक्षा–11–05–1989 * आचार्यपद– 20–06–2004

पट्टाधीशपद– 24–12–2010 (20–06–2004 को की गई उद्घोषणा के अनुसार)

परम पूज्य आचार्यश्री सन्मतिसागर जी महाराज के द्वारा की गई उद्घोषणाः–

हमारी समाधि के पश्चात् आपको इस संघ के संचालकपद पर नियुक्त करते हैं।

(अंकलीकर वाणी–जुलाई 2004) (अक्षयज्योति–अक्तूबर 2004)

# आराधनासमुच्चयं योगसारसंग्रह

सम्पादक


डॉक्टर आदिनाथ नेमिनाथ उपाध्ये

---

प्रकाशक

माणिकचन्द्र दिगम्बर जैन ग्रन्थमाला

(परम्परानायक)



परम पूज्य चारित्र–चक्रवर्ती,
आचार्यश्री आदिसागर जी महाराज
(अंकलीकर)

(द्वितीय पट्टाधीश)



**परम पूज्य तीर्थभक्त–शिरोमणि,**
आचार्यश्री महावीरकीर्ति जी महाराज

(तृतीय पट्टाधीश)



**परम पूज्य सिद्धान्त–चक्रवर्ती,**
आचार्यश्री सन्मतिसागर जी महाराज

(चतुर्थ पट्टाधीश)



परम पूज्य तपश्चर्या–चक्रवर्ती, आचार्यश्री सुविधिसागर जी महाराज

**दिगम्बर साधु निरन्तर पगविहार करते रहते हैं। ग्रन्थभण्डार को साथ में रख कर विहार करना अशक्यप्राय: होता है। फलत: उनको ग्रन्थों के सन्दर्भ देखने में असुविधा होती है। उनकी सुविधा के लिये इस कोश का निर्माण किया गया है। इस कोश के निर्माण में किसी भी प्रकार का व्यापारिक हेतु नहीं है।**

**आर्थिक दृष्टि से सम्पन्न श्रावकबन्धुओं से निवेदन है कि वे ग्रन्थ का विक्रय कर अध्ययन करने की परम्परा को कायम रखें।**

**मुखपृष्ठ पर हमने ग्रन्थकर्त्ता, अनुवादक, सम्पादक, प्रकाशक आदि के नाम दिये हैं। किसी संस्थान का कर्तुत्व हमने लुप्त नहीं किया है।**

**इस कोश के लिये आवश्यक ग्रन्थ हमें अनेक स्रोतों से प्राप्त हुये हैं। हम उन सभी का आभार मानते हैं।**

**सुविधि–परिवार**

ग्रन्थमाला संपादक
डॉ० हीरालाल जैन व डॉ० आ० ने० उपाध्ये

प्रकाशक
भारतीय ज्ञानपीठ
दुर्गाकुण्ड रोड वाराणसी

प्रथम आवृत्ति : १००० प्रतियाँ
मूल्य
एक रुपया

मुद्रक
सन्मति मुद्रणालय
वाराणसी

## General Editorial

It gives me great pleasure to present here the 49th Number of the Manikchandra D. Jaina Granthamala. It contains two small texts edited by my colleague Dr. A N. Upadhye. The Ms. of the Ārādhanā-samuccaya was procured by him with great efforts; while that of the Yogasārasaṃgraha was inherited by us from the Late Pt. Nathuram Premi. This Granthamālā has done signal service to the cause of Jaina literature by bringing to light many unpublished works. We are grateful to Shri Shanti Prasadji and to his enlightened wife Smt. Ramaji for so generously shouldering the responsibility of this Granthamālā. It is both an opportunity and a challenge to all earnest workers in the fields of Jaina literature. Many small and big works in Sanskrit, Prākrit and Apabhraṁśa still lie neglected in Jaina Bhandaras; and we earnestly appeal to our scholars to edit them and present them in a neat form : this is a duty which we owe to our Ācāryas who have left for us a great heritage in our literature. I thank Dr. A. N. Upadhye for giving us neat editions of the two works which are published for the first time in this volume.

Jabalpur
20-3-67

*H. L. Jain*

# प्रधान सम्पादकीय

श्री माणिकचन्द्र दिगम्बर जैन ग्रन्थमालाके इस ४९वें पुष्पको प्रस्तुत करते हमें बड़ी प्रसन्नता हो रही है। इसमें दो छोटी-छोटी रचनाएँ संग्रहीत हैं जिनका सम्पादन मेरे प्रिय सहयोगी डॉ० आदिनाथ नेमिनाथ उपाध्ये-द्वारा किया गया है। उन्होंने बड़े परिश्रमसे आराधना-समुच्चय-की आदर्श प्रति प्राप्त की तथा योगसारसंग्रहकी प्रति स्वर्गीय पं० नाथूराम-जी प्रेमीके संग्रहसे उपलब्ध हुई।

इस ग्रन्थमालाने अनेक अप्रकाशित ग्रन्थोंको प्रकाशमें लाकर जैन साहित्यकी स्मरणीय सेवा की है। हम श्री शान्तिप्रसादजी तथा उनकी विदुषी पत्नी श्रीमती रमाजीके बहुत कृतज्ञ हैं कि उन्होंने बड़ी उदारता-पूर्वक इस ग्रन्थमालाका भार अपने कन्धोंपर लेना स्वीकार कर लिया। उनका यह सत्कार्य जैन साहित्यके क्षेत्रमें सच्चे कार्यकर्ताओंके लिए एक सुअवसर भी है और चुनौती भी। अभी भी जैन शास्त्रभण्डारोंमें अनेक छोटे-बड़े संस्कृत, प्राकृत व अपभ्रंश ग्रन्थ उपेक्षित दशामें पड़े हुए हैं। हम अपने विद्वानोंसे साग्रह अनुनय करते हैं कि वे उन्हें सम्पादित कर स्वच्छ रूपमें प्रस्तुत करें। जिन आचार्योंने हमारे साहित्यमें ऐसा महान् दाय हमें प्रदान किया है उनके प्रति हमारा यही कर्तव्य व ऋण है।

प्रस्तुत संग्रहमें प्रथम बार प्रकाशित इन दोनों रचनाओंके ऐसे स्वच्छ संस्करण तैयार करनेके लिए मैं डॉ० आ० ने० उपाध्येको हृदयसे धन्य-वाद देता हूँ।

— ही. ला. जैन

## PREFATORY NOTE

Ārādhanā consists in firm and successful accomplishment of ascetic ideals, viz., Darśana ( Faith ), Jñāna (Knowledge), Cāritra (Conduct) and Tapas (Penance), that are laid down in Jainism; in maintaining a high standard of detachment, forbearance, self-restraint and mental equipoise in the critical hour of death; and in attaining spiritual purification and final liberation. The connotation of the term Ārādhanā covers a wide range of dogmatical and ethico-religious discussion to which small and big texts have been devoted. This subject is undoubtedly of immense importance and engrossing interest for a monk who wants to win the spiritual battle. Naturally, the topic of Ārādhanā is discussed in a number of works dealing with Śramaṇa's life, and even independent works have been composed on this theme. I have already listed these works in my Introduction to the Bṛhatkathākośa ( Singhi Jain Series, No. 17, Bombay 1943 Intro. pp 48 f.; also H. D. Velankar : Jinaratnakośa, Poona 1944, pp. 31 f. ). In this survey the Ārādhanā-sāra or samuccaya of Ravicandra ( the Mss. of which are reported to exist in Moodabidri and Strassburg ) is duly noted.

While editing the Kārttikeyānuprekṣā along with the Sanskrit commentary of Śubhacandra ( Rājachandra Jaina Śāstramālā, Agas 1960 ) I came across some quotations from the Ārādhanāsāra of Ravicandra in that commentary. In my Introduction I have duly noted there that half a dozen Mss. of Ravicandra's work are reported to exist in Moodabidri ( see K. B. Shastri : Kannaḍa-prāntīya Tāḍapatrīya Granthasūcī, Banaras 1948, pp. 37–8, 207–8 ). After persistent and patient efforts I could secure a transcript of this work from Moodabidri; and, in this connection, I wish to record my sincere thanks to Pt. Devakumar of Moodabidri who kindly supplied it. The text presented here is based on this transcript which is now in the possession of the Jaina Saṃskṛti Saṃrakshaka Sangha, Sholapur. Scribal slips in the transcript are duly corrected; and there have been no occasions for major emendation. The transcript opens :

श्री पंचगुरुभ्यो नमः । श्रीरविचन्द्रमुनीन्द्रविरचितः आराधनासमुच्चयः ।
and ends in this way :
इत्याराधनासमुच्चयं समाप्तमिति ॥

This work, possibly following the earlier models in Prākrit, is composed in Gāthās or Āryās in Sanskrit the total number of which is 252. There are 7 quotations here and there in the text, 2 in Prākrit and 5 in

Sanskrit. A glance at the Viṣayānukramaṇikā shows that this small treatise is a systematic composition dealing with the four-fold Ārādhanā and its kindred topics. The major bulk of the verses is devoted to the exposition of the Twelve Anuprekṣās which are included under Cāritra-Ārādhanā. The order of enumeration of these Anuprekṣās is the same as the one adopted by three authors : Śivārya, Vaṭṭakera and Kundakunda. This is but natural, because Śivārya's work, the Bhagavatī Ārādhanā, is a magnificient model for any treatise on Ārādhanā.

From the concluding verse we get very little information about the author. His name is Ravicandra; he calls himself a Munīndra; and he was staying at Panasoge (in Karṇāṭaka) when he composed this work The name Ravicandra figures in some of the epigraphs in Karnatak. One Ravicandra is mentioned in some of the inscriptions ( Epigraphia Carnatica, XII, Gubbi Taluk, No. 57; Journal of the Bombay Branch of the R. A. S., X, pp. 171-2, 204 f.) from which it seems that he is to be assigned to the last quarter of the 10th century A. D. The Dharwar inscription of A.D. 962 refers to one Ravicandra Munīśvara ( Annual Report of South Indian Epigraphy for 1934-5 23, p. 7 ). Another Ravicandra is mentioned in the Shravan Belgol inscriptions ( E. C., II, No. 53 ), and he lived in about A.D.

1131. One more Ravicandra who is styled as Māsopavāsi and S ( a ) iddhānta is referred to in some inscriptions ( See Nos. 169–70 of A. D. 1096, No. 342 of A. D. 1205, and No. 376 of c. 13th century A. D : Jaina Śilālekha Saṃgraha, Part 4, Varanasi 1964 ). They all flourished in the area of Karnatak. But the information given by our author is so meagre that he cannot be identified with any one of these for the present.

Of the various quotations given by Ravicandra in this Ārādhanāsamuccaya, the one coming after verse No. 204 namely, tattva-jñānam udāsīnam etc., numbered as 204*1, is taken from the Tattvānuśāsanam ( No. 221 ) of Rāmasena (ed. J. Mukthar, Delhi 1963). Pt. Jugalkishore Mukthar assigns Rāmasena c. to the middle of the 10th century A. D. So Ravicandra is later than Rāmasena. Further Ravicandra and his Ārādhanāsāra are specifically mentioned ( pp. 234,391 ) in the Sanskrit commentray of Śubhacandra ( on the Kārttikeyānuprekṣā, ed. noted above) who (see pp. 32, 220, 234,391, and 393) quotes a number of verses from Ravicandra's work ( Nos. 153, 36, 34, 198–205, 206–207 including the quotation 204*1 ). Śubhacandra completed this commentary in A. D. 1556; so Ravicandra must have flourished earlier than this date. Further

investigation is necessary to bring the two limits of his period nearer.

Ravicandra's work is not only a systematic work but also written in a lucid Sanskrit style. By the publication of this text, it is hoped that a welcome addition is made to the Ārādhanā texts so far published.

Lastly, I would be failing in my duty, if I did not record my sincere gratitude to the University Grants Commission, New Delhi, for having so graciously made me the grant intended for Retired Teachers. It is this timely aid that has enabled me, even after retirement, to pursue my researches in my specialised branches of Indology with the peace of mind all such work needs :

karmaṇyevādhikāras te.

Dhavalā :
VIII, Rajarampuri,
Kolhapur : 15-10-1965

*A. N. Upadhye*

## विषयानुक्रमणिका


| | | गाथा संख्या |
|---|---|---|
| १. सम्यग्दर्शनाराधना | .... | १– ४१ |
| २. सम्यग्ज्ञानाराधना | .... | ४२– ८५ |
| ३. सम्यक्चारित्राराधना | .... | ८६–१०१ |
| ४. अध्रुवानुप्रेक्षा | .... | १०२–१३९ |
| ५. अशरणानुप्रेक्षा | .... | १४०–१४४ |
| ६. एकत्वानुप्रेक्षा | .... | १४५–१४७ |
| ७. अन्यत्वानुप्रेक्षा | .... | १४८–१५१ |
| ८. संसारानुप्रेक्षा | .... | १५२–१५७ |
| ९. लोकानुप्रेक्षा | .... | १५८–१६६ |
| १०. अशुचित्वानुप्रेक्षा | .... | १६७–१७० |
| ११. आस्रवानुप्रेक्षा | .... | १७१–१७५ |
| १२. संवरानुप्रेक्षा | .... | १७६–१८० |
| १३. निर्जरानुप्रेक्षा | .... | १८१–१८५ |
| १४. धर्मानुप्रेक्षा | .... | १८६–१९१ |
| १५. बोधिदुर्लभानुप्रेक्षा | .... | १९२–१९७ |
| १६. सम्यक्तप आराधना | .... | १९८–२१० |
| १७. आराध्यस्वरूपम् | .... | २११–२२१ |
| १८. आराधकजनस्वरूपम् | .... | २२२–२३५ |
| १९. आराधनोपायाः | .... | २३६–२४० |
| २०. आराधनाफलम् | .... | २४१–२५० |
| २१. आराधनासमुच्चयम् | .... | २५१–२५२ |


■

❀ श्री-पञ्चगुरुभ्यो नमः ❀

श्री-रविचन्द्र-मुनीन्द्र-विरचितः

# आराधनासमुच्चयः

1. सम्यग्दर्शनबोधनचरित्ररूपान्प्रणम्य पञ्चगुरून् ।
आराधनासमुच्चयमागमसारं प्रवक्ष्यामः ॥ १ ॥

2. आराध्याराधकजनसोपायाराधनाफलाख्यं तु ।
पादचतुष्टयमेतत्समुदितमाराधनासिद्ध्यै ॥ २ ॥

3. तत्राराध्यं गुणगुणिभेदाद् द्विविधं गुणाश्च चत्वारः ।
सम्यग्दर्शनबोधनचरित्रतपो नाम समुपेताः ॥ ३ ॥

4. आप्तागमतत्त्वार्थश्रद्धानं तेषु भवति सम्यक्त्वम् ।
व्यपगतसमस्तदोषः सकलगुणात्मा भवेदाप्तः ॥ ४ ॥

5. आप्तोक्ता वागागमसंज्ञा नानाप्रमाणनयगहना ।
स्यादागमप्ररूपितरूपयुतार्था हि तत्त्वार्थाः ॥ ५ ॥

6. क्षुत्तृड्भीक्रुधागप्रमोहचिन्ताजरारुजामृत्यु- ।
खेदस्वेदमदारतिविस्मयनिद्राजन्मोद्वेगाः ॥ ६ ॥

7. दोषास्तेषां हन्ता केवलबोधादयो गुणास्तेषाम् ।
आधारः स्यादाप्तस्तद्विपरीतः स्यदाप्तासः ॥ ७ ॥ युग्मम् ॥

8. तदुक्तत्वात् पूर्वापरविरोधरूपादिदोषनिर्मुक्तः ।
स्यादागमस्तु तत्प्रतिपक्षोक्तिरनागमो नाम ॥ ८ ॥

9. जीवाजीवौ धर्माधर्मौ कालाकाशे च षडपि तत्त्वार्थाः ।
नानाधर्माक्रान्ता नेतररूपाः कदाचिदपि ॥ ९ ॥
10. सम्यग्दर्शनचिह्नं चित्ते प्रशमादिकं विजानीयात् ।
त्रिविकल्पं तदपि भवेदुपशममिश्रक्षयजभेदात् ॥ १० ॥

उक्तं च ।

10*1. तत्सरागं विरागं च द्विधौपशमिकं तथा ।
क्षायिकं वेदकं त्रेधा दशधाज्ञादिभेदतः ॥ इति ॥
11. तेषूपशमजसम्यग्दर्शनमुत्पत्तितो द्विधा भवति ।
मिथ्यादृष्टेराद्यं वेदकसम्यग्दृशो ह्यन्यत् ॥ ११ ॥
12. मिथ्यादृष्टिर्भव्यो द्विविधः संज्ञी समाप्तपर्याप्तिः ।
लब्धिचतुष्टययुक्तोऽत्यन्तविशुद्धश्चतुर्गतिजः ॥ १२ ॥
13. जाग्रदवस्थावस्थः साकारात्मोपयोगसंयुक्तः ।
योग्यस्थित्यनुभवभाक् सल्लेश्यावृद्धियुक्तश्च ॥ १३ ॥
14. त्रिकरणशुद्धिं कृत्वाप्यन्तरमुत्पादितत्रिदृङ्मोहः ।
गृह्णात्याद्यं दर्शनमनन्तसंसारविच्छेदी ॥ १४ ॥ त्रिकम् ॥
15. शुद्धं वा मिश्रं वा विरतिभ्यां कर्मभूमिजः शुद्धम् ।
शेषः क्षायिकदर्शनवत्तावत् कलुषताभावात् ॥ १५ ॥
16. परिहारमनःपर्ययबोधाहारर्द्धिजननमरणाद्यैः ।
रहितं तत्तत्कालो द्विविधोऽप्यन्तर्मुहूर्तः स्यात् ॥ १६ ॥
17. तत्कालस्यान्तर्यदि विराधितो वै भवेद् द्वितीयगुणः ।
नो चेद्दर्शनमोहत्रितयान्यतरोदयं याति ॥ १७ ॥
18. कालो द्वितीयगुणिनो ह्यपरः समयः परः षडावलिकः ।
मिथ्यात्वेऽसौ पतति तु भूम्यामिव गिरिशिरस्स्खलितः ॥ १८ ॥
19. सासादनस्य नरकेषूत्पत्तिर्नास्ति मरणमप्यनये ।
एकविकलेन्द्रियेषूत्पत्तिरिहाचार्यमतभेदात् ॥ १९ ॥

20. अथ मिथ्यात्वोदयगो जघन्यतोऽन्तर्मुहूर्तमुत्कर्षात् ।
पुद्गलपरिवर्तार्धं तिष्ठति तद्द्विविधपरिणामैः ॥ २० ॥
21. द्वित्रिचतुःपञ्चादिप्रभेदतस्तद्भवेदनेकविधम् ।
कुगतिगमनैकमूलं मिथ्यात्वं भवति जीवानाम् ॥ २१ ॥
22. अथ सम्यक्मिथ्यात्वं गतवांस्तस्योदयोत्थितैर्भावैः ।
मिश्रश्रद्धानकरैः क्षायोपशमाह्वयैरास्ते ॥ २२ ॥
23. अन्तर्मुहूर्तकालं तद्भवमरणादिवर्जितस्तस्मात् ।
च्युतवान् दर्शनमोहद्वितयान्यतरोदयमुपैति ॥ २३ ॥ युग्मम् ॥
24. अथ सम्यक्त्वं प्राप्तस्तत्कर्मोदयभवैश्च परिणामैः ।
क्षायोपशमिकसंज्ञैः शिथिलश्रद्धानजैर्वसति ॥ २४ ॥
25. अन्तर्मुहूर्तकालं जघन्यतस्तत्प्रयोग्यगुणयुक्तः ।
षट्षष्टिसागरोपमकालं चोत्कर्षतो विधिना ॥ २५ ॥ युग्मम् ॥

उक्तं च ।

25*1. लांतवकप्पे तेरस अच्चुदकप्पे य होंति बावीसा ।
उवरिम एक्कतीसं एवं सव्वाणि छावट्ठी ॥ इति ॥
26. वेदकसम्यग्दृष्टिर्वाञ्छन्नारोढुमुपशमश्रेणीम् ।
प्रथमकषायान्करणैराचार्यमतेन विनियोज्य ॥ २६ ॥
27. त्रिकरण्या दृङ्मोहत्रितयं प्रशमय्य याति चोपशमम् ।
सम्यक्त्वमुपशमश्रेणीनिभकालप्रवेशाभ्याम् ॥ २७ ॥
28. उपशमकश्रेणिं तेनारुह्य ततोऽवतीर्य वा म्रियते ।
जननं लेश्यावशतो निवारितर्द्धीश्च समुपैति ॥ २८ ॥ त्रिकम् ॥
29. अविरतसम्यग्दृष्ट्याद्येषु चतुर्ष्वपि गुणेषु कस्मिंश्चित् ।
वेदकदृष्टिस्त्रिकरण्यादिकषायान् विसंयोज्य ॥ २९ ॥
30. निर्वृतियोग्ये क्षेत्रे काले लिङ्गे भवे तथा वयसि ।
शुभलेश्यात्रयवृद्धिं कषायहानिं च संविदधत् ॥ ३० ॥

31. क्षपकश्रेणीसदृशप्रवेशकालान्तरैस्त्रिभिः करणैः ।
हत्वा दृङ्मोहत्रयमाप्नोति क्षायिकीं दृष्टिम् ॥ ३१ ॥ त्रिकम् ॥

32. क्षायिकसम्यग्दर्शनमाप्तोक्तार्थेषु निश्चलात्मरुचिः ।
वातैर्मन्दरगिरिवन्न विचलति कुहेतुदृष्टान्तैः ॥ ३२ ॥

33. उत्पद्यते हि वेदकदृष्टिः स्वमरेषु कर्मभूमिनृषु ।
कृतकृत्यक्षायिकदृग्बद्धायुष्कश्चतुर्गतिषु ॥ ३३ ॥

34. षट्सु वधः पृथ्वीषु ज्योतिर्वनभवनजेषु च स्त्रीषु ।
विकलैकेन्द्रियजातिषु सम्यग्दृष्टेर्न चोत्पत्तिः ॥ ३४ ॥

35. बद्धायुष्यचतुष्कोऽप्युपैति सम्यक्त्वमुदितभेदयुतम् ।
विरतिद्वितयं बद्धः स्वर्गायुष्यात्परं नैव ॥ ३५ ॥

36. पुद्गलपरिवर्तार्धं परतो व्यालीढवेदकोपशमौ ।
वसतः संसाराब्धौ क्षायिकदृष्टिर्भवचतुष्कः ॥ ३६ ॥

37. अथवा द्वेधा दशधा बहुधा सम्यक्त्वमूनमेतेन ।
ज्ञानचरित्रतपो वै नालं संसारमुच्छेत्तुम् ॥ ३७ ॥

38. वृक्षस्य यथा मूलं प्रासादस्य च यथा ह्यधिष्ठानम् ।
विज्ञानचरिततपसां तथा हि सम्यक्त्वमाधारः ॥ ३८ ॥

39. दर्शननष्टो नष्टो न तु नष्टो भवति चरणतो नष्टः ।
दर्शनमपरित्यजतां परिपतनं नास्ति संसारे ॥ ३९ ॥

40. त्रैलोक्यस्य च लाभाद्दर्शनलाभो भवेत्परां श्रेष्ठः ।
लब्धमपि त्रैलोक्यं परिमितकाले यतश्च्यवते ॥ ४० ॥

41. निर्वाणराज्यलक्ष्म्याः सम्यक्त्वं कण्ठिकामतः प्राहुः ।
सम्यग्दर्शनमेव निमित्तमनन्ताव्ययसुखस्य ॥ ४१ ॥

॥ इति सम्यग्दर्शनाराधना ॥ १ ॥

42. दर्शयति यत्पदार्थानन्तर्ज्योतिः प्रकाशयत्यन्तात् ।
पूर्वमनाकारं तच्चैतन्यं दर्शनं विन्द्यात् ॥ १ ॥

43. तच्चक्षुरादिदर्शनभेदात्प्रविकल्प्यमानमाप्नोति ।
चातुर्विध्यमनेकप्रभेदसंदोहसंयुक्तम् ॥ २ ॥

44. चक्षुर्ज्ञानात्पूर्वं प्रकाशरूपेण विषयसंदर्शी ।
यच्चैतन्यं प्रसरति तच्चक्षुर्दर्शनं नाम ॥ ३ ॥

45. शेषेन्द्रियावबोधात् पूर्वं तद्विषयदर्शि यज्ज्योतिः ।
निर्गच्छति तदचक्षुर्दर्शनसंज्ञं स्वचैतन्यम् ॥ ४ ॥

46. अवधिज्ञानात्पूर्वं रूपिपदार्थावभासि यज्ज्योतिः ।
प्रविनिर्याति स्वस्मान्नाम्नावधिदर्शनं तत्स्यात् ॥ ५ ॥

47. केवलबोधनविषयप्रकाशि यज्ज्योतिरात्मनो निःसृतम् ।
तत्केवलदर्शनमिति वदन्ति निःशेषतत्त्वविदः ॥ ६ ॥

48. दृक्पूर्व एव बोधः कारणकार्यत्वदर्शनात्तु तयोः ।
तदपि च्छद्मस्थानां क्रमोपयोगप्रवृत्तेः स्यात् ॥ ७ ॥

49. केवलदर्शनबोधौ समस्तवस्तुप्रभासिनौ युगपत् ।
दिनकृत्प्रकाशतापवदावरणाभावतो नित्यम् ॥ ८ ॥

50. चतुरिन्द्रियादिनष्टकषायान्तं प्रथमदर्शनं विन्द्यात् ।
एकेन्द्रियादिनष्टकषायान्तं स्याद् द्वितीयं च ॥ ९ ॥

51. अविरतसम्यग्दृष्ट्याद्या क्षीणकषायमवधिदर्शनकम् ।
केवलिनोः सिद्धानां चतुर्थकं स्यादिति प्राहुः ॥ १० ॥

52. प्रथमतृतीये कालः सादिः सान्तो द्वितीयकेऽनादिः ।
सान्तोऽनन्तश्च भवेच्चतुर्थके साधनन्तः स्यात् ॥ ११ ॥

53. जानाति यत्पदार्थान् साकारं निश्चयेन तज्ज्ञानम् ।
ज्ञायन्ते वा येन ज्ञप्तिर्वा तत्प्रमाणाख्यम् ॥ १२ ॥

54. तद् वै मतिश्रुतावधिमनःपर्ययकेवलाख्यभेदेन ।
भिन्नं पञ्चविकल्पं भवतीति वदन्ति विद्वांसः ॥ १३ ॥

55. इन्द्रियमनोभिरभिमुखनियमितरूपेण वस्तुविज्ञानम् ।
भवति मतिज्ञानं तत् षट्त्रिंशत् त्रिशतभेदयुतम् ॥ १४ ॥
56. इन्द्रियमनसां षण्णां प्रत्येकमवग्रहादयो भेदाः ।
चत्वारस्तत्राद्यो द्विविधोऽर्थव्यञ्जनविकल्पात् ॥ १५ ॥
57. चक्षुर्मनसोर्नास्ति व्यञ्जनभेदः पृथक् पृथक् तेषाम् ।
बहुबहुविधादिभेदाद् द्वादश निर्दर्शितास्तज्ज्ञैः ॥ १६ ॥
58. अथवा द्वित्रिचतुःपञ्चादिविकल्पैर्विकल्प्यमानं तत् ।
संख्यातासंख्यातप्रभेदसंघातमाप्नोति ॥ १७ ॥
59. निष्पतदन्तर्ज्योतिर्बलमतिविभवप्रभाषितादर्थात् ।
अर्थान्तरविज्ञानं श्रुतविज्ञानं विजानीयात् ॥ १८ ॥
60. पर्यायाक्षरपदसंघातादिविकल्पभिद्यमानं तत् ।
विंशतिभेदं भवतीत्याहुर्विश्वार्थतत्त्वज्ञाः ॥ १९ ॥
61. यत्तु जघन्यं ज्ञानं सूक्ष्मैकेन्द्रियजलब्ध्यपर्याप्तेः ।
तल्लब्ध्यक्षरसंज्ञं पर्यायाख्यं निरावरणम् ॥ २० ॥
62. तस्योपरि षड्वृद्धिषु पर्यायसमासनामयुक्तानि ।
ज्ञानानि संभवन्ति हि संख्यातीतानि तेष्वन्त्यात् ॥ २१ ॥
63. ज्ञानादनन्तगुणविज्ञानं कैवल्यबोधसंख्येय-।
भागप्रमाणमक्षरविज्ञानं कथ्यतेऽर्हद्भिः ॥ २२ ॥ युग्मम् ॥
64. एकाक्षरादिवृद्ध्या वृद्धास्तस्योपरि क्रमेणैते ।
अक्षरसमासबोधाः संख्येयाः संभवन्त्येवम् ॥ २३ ॥
65. संख्येयाक्षरजनितं पदविज्ञानं वदन्ति विश्वज्ञाः ।
प्राग्वत्तदुपरि वृद्धा बोधाः स्युः पदसमासाख्याः ॥ २४ ॥
66. संघातादिज्ञानान्यापूर्वसमासमुक्तया वृद्ध्या ।
ज्ञेयान्येवं भव्यैः सर्वज्ञाज्ञाविधानेन ॥ २५ ॥

67. अक्षरजमनक्षरजं चेति द्विविधं समासतस्तत्स्यात् ।
द्विविधं चाक्षरसंभवमङ्गानङ्गप्रभेदेन ॥ २६ ॥
68. आचारादिविकल्पाद् द्वादशभेदात्मकं भवेत्प्रथमम् ।
सामायिकादिभेदादितरच्च चतुर्दशविकल्पम् ॥ २७ ॥
69. मतिजश्रुतजे ज्ञाने सदृशे ते सर्वदाप्यविच्छेदात् ।
तद् द्वितयमपि परोक्षं मतिजं व्यवहारतोऽप्यक्षम् ॥ २८ ॥
70. रूपिद्रव्यनिबद्धं देशप्रत्यक्षमवधिविज्ञानम् ।
देशावधिपरमावधिसर्वावधिभेदतस्त्रिविधम् ॥ २९ ॥
71. देशावधिविज्ञानं भवगुणकारणतया द्विधा भवति ।
तत्रैकैकं त्रिविधं जघन्यमध्योत्तमविकल्पात् ॥ ३० ॥
72. द्रव्यं क्षेत्रं कालं भावं च प्रति जघन्यमध्यपरम् ।
मध्यमसंख्यातविधं शेषद्वितयं तदेकैकम् ॥ ३१ ॥
73. गुणकारणजं तिर्यङ्मर्त्येषु विकल्पतस्तु षड्भेदम् ।
भवकारणजं नारकदेवेषु बहुप्रभेदं तत् ॥ ३२ ॥
74. प्रादेशिकं तु गौण्यं भवकारणमविकलात्मदेशभवम् ।
प्रतिपाति लोकमात्रं ह्यप्रतिपाति तु ततोऽभ्यधिकम् ॥ ३३ ॥
75. गुणकारणस्य नाभेरुपरि भवन्ति हि शुभानि चिह्नानि ।
श्रीवृक्षादीनि स तैर्नेत्रेणेव स्फुटं पश्येत् ॥ ३४ ॥

उक्तं च ।

75*1. उत्पद्यतेऽथ मिथ्यागुणजस्य विभङ्गसंज्ञको जन्तोः ।
नाभेरधस्थदर्दुरकाकोलूकाद्यशुभचिह्नात् ॥ इति ॥
76. परमावधिविज्ञानं चरमशरीरस्य संयतस्य भवेत् ।
पूर्ववदेतत् त्रिविधं द्रव्यक्षेत्राद्यमाश्रित्य ॥ ३५ ॥
77. उत्कृष्टजघन्यद्वयमेकैकविकल्पमेव जानीयात् ।
मध्यमजाताभेदा भवन्त्यसंख्येयसंघाताः ॥ ३६ ॥

78. सर्वावधिविज्ञानं विरामदेहस्य संयतस्यैव ।
प्रादुर्भवति स जानात्यणुमुचितक्षेत्रकालाद्यैः ॥ ३७ ॥
79. आद्यं विज्ञानत्रयमुदितं मिथ्यात्वकर्मणो ह्युदयात् ।
विपरीतरूपमाप्तं मत्यज्ञानादि नाम स्यात् ॥ ३८ ॥
80. अर्थानां याथात्म्याग्रहणात्संज्ञानमेव चाज्ञानम् ।
युक्ताचाराभावात् पुत्रस्यापुत्रसंज्ञावत् ॥ ३९ ॥
81. अन्यमनोगतविषयः स्वचेतसा संविलोक्यते येन ।
तद्धीपर्ययबोधनमृजुविपुलविकल्पतो द्विविधम् ॥ ४० ॥
82. ऋजुधीपर्ययबोधनमुत्तममध्यमजघन्यतस्त्रिविधम् ।
मध्यमनेकविकल्पं श्रेष्ठजघन्यद्वयमभेदम् ॥ ४१ ॥
83. विपुलमनःपर्ययमपि जघन्यमध्योत्तमाख्यया त्रिविधम् ।
निर्भेदमुत्तमाधममनेकभेदात्मकं मध्यम् ॥ ४२ ॥
84. एतानि ज्ञानानि स्वावरणानां क्षयोपशमजानि ।
केवलमशेषवस्तुस्वरूपसंवेदि तत् क्षयजम् ॥ ४३ ॥
85. सामान्यविशेषात्मकवस्तुग्रहणात्प्रमाणमेतद्धि ।
नय एकांशग्रहणाद् दुर्नय इतरांशनिर्लोपात् ॥ ४४ ॥

॥ इति सम्यग्ज्ञानाराधना ॥ २ ॥

86. प्राणीन्द्रियेषु षड्विधभेदेषु हि संयमश्चरित्रं तु ।
सामायिकादिभेदात्पञ्चविधं तद्विजानीयात् ॥ १ ॥
87. सावद्ययोगविरतिः सर्वव्रतसमितिगुप्तिधर्माद्यैः ।
भेदै रहितापि युता सामायिकसंयमो नाम ॥ २ ॥
88. व्रतसमितिगुप्तिसंयमशीलगुणादिकविकल्पसंयुक्ताम् ।
विरतिं वदन्ति सन्तश्छेदोपस्थापनाचरितम् ॥ ३ ॥
89. त्रिविधविकल्पसमन्वितसूक्ष्मासंख्येयलोकपरिणामैः ।
सदृशे ते चारित्रे व्यतिरेकाभावतो नित्यम् ॥ ४ ॥

90. त्रिंशद्वर्षाद् योगी वर्षपृथक्त्वं च तीर्थकरमूले ।
प्रत्याख्यानमधीत्य च गच्छति द्वितयगो विवसे [ ? ] ॥ ५ ॥

91. संयमविनाशभीरुर्लभते परिहारसंयमं शुद्धम् ।
त्रिविधास्तत्परिणामा भवन्त्यसंख्यातसंख्यानाः ॥ ६ ॥

92. परिहारर्द्धिसमेतः षड्जीवनिकायसंकुले विचरन् ।
पयसेव पद्मपत्रं न लिप्यते पापनिवहेन ॥ ७ ॥

93. सूक्ष्मीकृते तु लोभकषाये श्रेणिद्वये निवृत्तिमयैः ।
परिणामैर्भवति यतः सूक्ष्मचरित्रं गुणपवित्रम् ॥ ८ ॥

94. मोहानुदयादेकाकारमनोगुणचतुष्टये नित्यम् ।
उपशान्तकषायाद्ये भवति चरित्रं यथाख्यातम् ॥ ९ ॥

95. आद्ये चरित्रे स्यातां प्रमत्तमुख्येषु वै गुणेषु चतुर्षु ।
परिहारर्द्धिर्गुणयोर्द्वयोः प्रमत्ताद्ययोरेव ॥ १० ॥

96. आद्यचरित्रद्वितयं ह्युपशममिश्रक्षयैर्भवेन्मध्यम् ।
क्षायोपशमिकमन्त्यं चोपशमक्षयभवं द्वितयम् ॥ ११ ॥

97. क्षायोपशमिकमन्यद् देशचरित्रं तु पञ्चमे तु गुणे ।
नानापरिणामे गुणचतुष्टये विरतिरौदयिकी ॥ १२ ॥

98. आद्येषु त्रिषु चरित्रेष्वपरः समयः परो भवेत्कालः ।
देशोनपूर्वकोटी प्रतीत्य भृशमेकजीवं तु ॥ १३ ॥

99. अन्तर्मुहूर्तसमयौ परावरौ सूक्ष्मसांपरायाख्ये ।
देशोनपूर्वकोटिः समयश्च विरागचारित्रे ॥ १४ ॥

100. अन्तर्मुहूर्तमपरं देशचरित्रे वदन्ति कालं हि ।
देशोनपूर्वकोटीमुत्कृष्टं विश्वतत्त्वज्ञाः ॥ १५ ॥

101. अन्तर्मुहूर्तभङ्गत्रितयौ हीनोत्तमावविरतौ तु ।
नानाजीवापेक्षा सर्वाद्धा सूक्ष्मरहितेषु ॥ १६ ॥

॥ इति सम्यक्चारित्राराधना ॥ ३ ॥

102. इन्द्रियमनसोर्दर्पप्रणाशकं वर्तनं तपो नाम।
बाह्याभ्यन्तरभेदाद् द्विविधं तत्प्राहुरार्षज्ञाः ॥ १ ॥
103. बाह्यं षडात्मकं स्यादनशनकादीनि तदभिधानानि।
साकांक्षमनाकांक्षं चेत्यनशनमभिमतं द्वेधा ॥ २ ॥
104. द्रव्यक्षेत्रादिवशात् साकांक्षमनेकभेदसंयुक्तम्।
त्रिविधमनाकांक्षमपि प्रायोपगमादिभेदेन ॥ ३ ॥
105. स्वपरव्यापृतिरहितं मरणं प्रथमं द्वितीयमात्मभवम्।
व्यापारयुतं चान्त्यं स्वपरव्यापारसंयुक्तम् ॥ ४ ॥
106. यत्साम्यशनं तत्स्यादवमोदर्यं तपः सुबहुभेदम्।
रसरहितौदनभुक्तिर्नानाभेदो रसत्यागः ॥ ५ ॥
107. भिक्षासमुत्थकांक्षारोधो नानाथ वृत्तिपरिसंख्या।
योगैरनेकभेदैः कायक्लेशोऽङ्गसंतपनम् ॥ ६ ॥
108. स्त्रीपश्वादिविवर्जितदेशे शुद्धे निवसनमध्ययन-।
ध्यानादिविवृद्ध्यर्थं विविक्तशयनासनं षष्ठम् ॥ ७ ॥
109. बाह्यजनज्ञातत्वाद् बाह्येन्द्रियदर्पनाशकरणाच्च।
मार्गप्रभावनाकरमेतद् बाह्यं तपो नाम ॥ ८ ॥
110. आभ्यन्तरं च षोढा प्रायश्चित्तादिभेदतो भवति।
दश पञ्चदश च पञ्च च चत्वारो द्वौ च तद्भेदाः ॥ ९ ॥
111. कृतदोषस्य निवृत्तिं प्रायश्चित्तं वदन्ति सकलविदः।
आलोचनादयस्तद्भेदा दश सम्यगवगम्याः ॥ १० ॥
112. त्रिकरणशुद्ध्या नीचैर्वृत्तिर्विनयं सदाभिपूज्येषु।
सम्यक्त्वाद्याश्रयणात् पञ्चविधः सोऽपि विज्ञेयः ॥ ११ ॥
113. व्यापदि यत् क्रियते तत् वैयावृत्यं स्वशक्तिसारेण।
आचार्यादिसमाश्रयवशतो दशधा विकल्प्यं तत् ॥ १२ ॥
114. स्वध्ययनमागमस्य स्वाध्यायाख्यं तपस्ततो मुख्यम्।
परिवर्तनादिभेदात्पञ्चविधं तद्वदन्त्यार्याः ॥ १३ ॥

115. उत्तमसंहननस्यैकाग्रजचिन्तानिरोधनं ध्यानम् ।
अन्तर्मुहूर्तकालं चार्तादिचतुःप्रकारयुतम् ॥ १४ ॥
116. इतरत्रिकसंहननस्यास्थिरपरिणामसंयुतस्यापि ।
स्यादार्त्ताद्यादिकचिन्ता हेतुद्वितये च परिणामः ॥ १५ ॥
117. अर्तिर्दुःखं तस्यां ध्यानमार्तंनाम भवेत् ।
स्वेष्टवियोगाद्युद्भवभेदेन चतुर्विकल्पं तत् ॥ १६ ॥
118. स्वेष्टवियोगादौ सति हेतौ बाह्येऽपनीतये तस्य ।
बुद्धिसमन्वाहारे ह्यार्तध्यानानि चत्वारि ॥ १७ ॥
119. रुद्रः क्रूरस्तस्मिन्समुद्भवं रौद्रनामकं ध्यानम् ।
भवति चतुर्विधमेतत् हिंसानन्दादिभेदेन ॥ १८ ॥
120. हिंसादीनां बाह्ये हेतौ सति तत्प्रसिद्धये स्थिरके ।
बुद्धिसमन्वाहारे रौद्रध्यानानि चत्वारि ॥ १९ ॥
121. धर्मसहचारिपुरुषो धर्मस्तत्कर्मधर्म्यनाम स्यात् ।
ध्यानं चतुर्विधं तद्यथाज्ञाविचयादिभेदेन ॥ २० ॥
122. आज्ञेत्यागमसंज्ञा तदुदिताशेषवस्तुसंदोह- ।
गुणपर्यायविचिन्तनमाज्ञाविचयाह्वयं ध्यानम् ॥ २१ ॥
123. ज्ञानावरणादीनामपायसंचिन्तनं स्थिरत्वेन ।
विद्यादपायविचयं ध्यानं नानाप्रभेदं तत् ॥ २२ ॥
124. बन्धादिभिर्विकल्पैश्चतुर्विधो दुरितसंकुलापायः ।
प्रकृतिस्थित्याद्यैरपि तत्रैकैकं चतुर्भेदम् ॥ २३ ॥
125. षोडशकपञ्चविंशतिदशकचतुष्षट्कस्यैकषट्त्रिंशत् ।
पञ्चकषोडशकैकं बन्धापाया गुणेषूक्ताः ॥ २४ ॥
126. सैकद्विषोडशत्रिंशद् द्वादश चात्रोदयापायाः ।
दशचतुरेकं सप्तादशाष्टपञ्चकचतुष्कषट्षट्कम् ॥ २५ ॥
127. दशचतुरेकं सप्तादशाष्टकाष्टकचतुष्कषट्षट्कम् ।
सैकद्विषोडशैकोना चत्वारिंशद् विपाकाः ॥ २६ ॥

128\. सप्ताष्टषोडशैकैकं षट्कैकैकमेकमेकैकम् ।
षोडशपञ्चाशीतिः सत्त्वापायास्तु दुरितानाम् ॥ २७ ॥

129\. दुरितानां तु शुभाशुभभेदानां पाकजातसुखदुःख- ।
भेदप्रभेदचिन्ताविपाकविचयाख्यधर्म्यं तु ॥ २८ ॥

130\. तीर्थकृदिन्द्ररथाङ्गभृदादिसुखं पुण्यकर्मसंपाकः ।
नारकतिर्यङ्नृणां दुःखं दुष्कर्मपाकस्तु ॥ २९ ॥

131\. द्वादशधा गदितानुप्रेक्षा संचिन्तनं वदन्त्यार्याः ।
संस्थानविचयनामध्यानमनेकप्रभेदसंयुक्तम् ॥ ३० ॥

132\. अध्रौव्याशरणैकत्वान्यत्वकमाजवंजवीलोकोऽ- ।
शुचिताश्रवसंवरणं निर्जरणं धर्मबोधि च ध्येयम् ॥ ३१ ॥

133\. ध्रौव्याध्रौव्याद्यात्मन्यर्थेऽनेकान्तवादसंश्रयणात् ।
नर्ते घटते नष्टं रूपं वक्तुर्विवक्षायाम् ॥ ३२ ॥

134\. भुवनत्रितये पुण्योदर्कजवस्तूनि यानि दृश्यन्ते ।
तान्यनिलाहतदीपशिखावत्सर्वाण्यनित्यानि ॥ ३३ ॥

135\. इन्द्रादिनिलिम्पानामष्टगुणैश्वर्यसंयुता संपत् ।
शारदशुभ्रादभ्राभ्रोत्करविभ्रमनिभाशेषा ॥ ३४ ॥

136\. चक्रधरादिनराणां संपत्तिरनेकभोगकलकलिता ।
रत्ननिधिनिवहपूर्णा करीन्द्रकर्णाग्रवच्चपला ॥ ३५ ॥

137\. रूपं कान्तिस्तेजो यौवनसौभाग्यभाग्यमारोग्यम् ।
विभ्रमविलासलावण्यादिकमचिरांशुलसनाभम् ॥ ३६ ॥

138\. आत्मन्येकीभूतः कायोऽप्यमरेन्द्रचापवत्सहसा ।
प्रविलीयते किमन्यत् कर्मकृतं दृश्यते नित्यम् ॥ ३७ ॥

139\. जलबुद्बुदेन्द्रचापक्षणरुच्यादीनि नित्यतां नेतुम् ।
शक्यन्ते देवाद्यैर्न कर्मजनितानि वस्तूनि ॥ ३८ ॥

। इत्यध्रुवानुप्रेक्षा ।

140. दुष्कर्मपाकसंभवजन्मजरामरणरोगशोकादि- ।
संपाते शरणं नो जगत्त्रये विद्यते किंचित् ॥ ३९ ॥

141. स्वर्गो दुर्गं वज्रं प्रहरणमैरावणो गजो भृत्याः ।
गीर्वाणा देवेशः शरणं नो किं परेषु वाच्यः ॥ ४० ॥

142. बहुजात्याश्वमदद्विपरथनायकबलरथाङ्गशस्त्रादि- ।
चक्रेशः शरणं मर्त्येषु परेषु का वार्ता ॥ ४१ ॥

143. किंजल्कपुञ्जपिञ्जरगुञ्जज्जलविकरराजिताब्जवनम् ।
मदकुञ्जरवद्वार्यो मृत्युर्मृद्नाति भुवनमिदम् ॥ ४२ ॥

144. यद्वन्न शरणमुग्रद्विपविद्रुविह्वलवदनवर्तिहरिणशिशोः ।
तद्वन्न शरणमन्तकदन्तान्तरवर्तिजनतायाः ॥ ४३ ॥

। इत्यशरणानुप्रेक्षा ।

145. एको गर्भार्भकनवयौवनमध्यत्ववृद्धतावस्थाः ।
व्याधिभयमरणशोकव्यायासाननुभवत्यात्मा ॥ ४४ ॥

146. विविधसुखदुःखकारणशुभाशुभाख्यान्कर्मसंघातम् ।
स्वनिमित्तवशादेको बध्नाति विचित्रपरिणामैः ॥ ४५ ॥

147. दृग्बोधनादिगुणरूपात्मा कर्माष्टकं निमित्ताभ्याम् ।
उन्मूल्य समूलं स्वयमुपैति निर्वाणसुखमेकः ॥ ४६ ॥

। इत्येकत्वानुप्रेक्षा ।

148. मातृपितृपुत्रपौत्रभ्रातृकलत्रादिबन्धुतां कर्म ।
योजयति वियोजयति च मारुत इव जीर्णपर्णानि ॥ ४७ ॥

149. अन्योऽन्योऽयं प्राणी मोहोदयविह्वलीकृतोऽन्यस्य ।
शोके हर्षे जाते करोति वत शोकहर्षौ च ॥ ४८ ॥

150. कार्येण जनस्य जनः शत्रुर्मित्रं च भवति लोकेऽस्मिन् ।
भिन्नस्वभावकोऽयं सिकतामुष्टिवदशेषजनः ॥ ४९ ॥
151. ज्ञानादिगुणप्रकृतिकजीवद्रव्यात्परं स्वकायादि ।
यद् दृश्यते समस्तं तदन्यदिति बुद्धिमत्तत्त्वम् ॥ ५० ॥

। इत्यन्यत्वानुप्रेक्षा ।

152. पञ्चविधे संसारे कर्मवशाज्जैनदेशितं मुक्तेः ।
मार्गमपश्यन्प्राणी नानादुःखाकुले भ्रमति ॥ ५१ ॥
153. सर्वेऽपि पुद्गलाः खल्वेकेनात्तोज्झिताश्च जीवेन ।
ह्यसकृत्त्वनन्तकृत्वः पुद्गलपरिवर्तसंसारे ॥ ५२ ॥
154. सर्वत्र जगत्क्षेत्रे देशो न ह्यस्ति जन्तुनाक्षुण्णः ।
ह्यवगाहनानि बहुशो बंभ्रमता क्षेत्रसंसारे ॥ ५३ ॥
155. उत्सर्पणावसर्पणसमयावलिकासु निरवशेषासु ।
जातो मृतश्च बहुशः परिभ्रमन्कालसंसारे ॥ ५४ ॥
156. नरकजघन्यायुष्याद्युपरिग्रैवेयकावसानेषु ।
मिथ्यात्वसंश्रितेन हि भवस्थितिर्भाविता बहुशः ॥ ५५ ॥
157. सर्वप्रकृतिस्थित्यनुभागप्रदेशबन्धयोग्यानि ।
स्थानान्यनुभूतानि भ्रमता भुवि भावसंसारे ॥ ५६ ॥

। इति संसारानुप्रेक्षा ।

158. जीवाद्यर्था यस्मिन् लोक्यन्तेऽसौ निरुच्यते लोकः ।
सोऽधो मध्योर्ध्वभिदा त्रेधा बहुधा प्रभेदैः स्यात् ॥ ५७ ॥
159. स्यात्सुप्रतिष्ठकाकृतिरनादिनिधनात्मको ह्यधः सदृशः ।
वेत्रासनेन मध्यं झल्लर्योर्ध्वं मृदङ्गेन ॥ ५८ ॥
160. सप्ताधो नरकाः स्युर्मध्ये द्वीपाम्बुराशयोऽसंख्याः ।
स्वर्गास्त्रिषष्टिभेदा निर्वाणक्षेत्रमत्रोर्ध्वम् ॥ ५९ ॥

161. अत्युष्णशीतकर्कशरूक्षाशुचिरतिविरसदुर्गन्धि– ।
भूमिषु नरकेष्विमं दुःखं प्राप्नोति पापिजनः ॥ ६० ॥

162. छेदनभेदनताडनबन्धनविशसनविलम्बनं तपन– ।
ज्वलनादिकर्म सततं प्रकुर्वते नरकिणोऽन्योन्यम् ॥ ६१ ॥

163. एकद्वित्रिचतुःपञ्चेन्द्रियसंज्ञाश्च जगति तिर्यञ्चः ।
दुःखमनेकविकल्पं पापोदर्कादनुभवन्ति ॥ ६२ ॥

164. मनुजेषु पापपाकाद् दुःखमनेकप्रकारमाप्नोति ।
प्राणिगणः पुण्यवशादभ्युदयसुखानि विविधानि ॥ ६३ ॥

165. शुद्धाशुद्धचरित्रैर्नानाभेदोच्चनीचनिलयेषु ।
संभूतो देवगणः सौख्यमनो दुःखमनुभवति ॥ ६४ ॥

166. मर्त्यक्षेत्रसमाने श्वेतच्छत्रोपमे जगच्छिखरे ।
स्वोत्थं सौख्यमनन्तं विध्वस्ताघो जनो भजते ॥ ६५ ॥

। इति लोकानुप्रेक्षा ।

167. अशुचितमशुक्रशोणितसंभूतं छर्दिवाक्संवृद्धम् ।
दोषमलधातुनिलयः कथं शरीरं वद शुचीदम् ॥ ६६ ॥

167*1-2. उक्तं च श्लोकद्वयम् ।

रसाद् रक्तं ततो मांसं मांसान्मेदः प्रवर्तते ।
मेदसोऽस्थि ततो मज्जा मज्जाशुक्रं ततः प्रजाः ॥
वातं पित्तं तथा श्लेष्म सिरा स्नायुश्च चर्म च ।
जठराग्निरिति प्राज्ञैः प्रोक्ताः सप्तोपधातवः ॥ इति ॥

168. अस्थिघटितं सिरासंबद्धं चर्मावृतं च मांसेन ।
व्यालिप्तं किल्बिषवसु कथं नु शुचि देहगेहमिदम् ॥ ६७ ॥

169. शुचिसुरभिपूतजलमाल्याम्बरगन्धाक्षतादिवस्तूनि ।
स्पर्शेनाशुचिभावं नयति कथं शुचि भवेदङ्गम् ॥ ६८ ॥

170. मक्षिकपत्रसमानं यदि चर्माङ्गस्य भवति नो काये ।
द्रष्टुं स्प्रष्टुं काकादिभ्यस्त्रातुं च नो शक्यम् ॥ ६९ ॥

। अशुचित्वानुप्रेक्षा ।

171. जन्मसमुद्रे बहुदोषवीचिके दुःखजलचराकीर्णे ।
जीवस्य परिभ्रमणे निमित्तमात्रास्रवो भवति ॥ ७० ॥

172. यद्वत्सास्रवपोतो वारिधिमध्ये निमज्जति क्षिप्रम् ।
तद्वत्कर्मास्रववज्जीवः संसारवारिनिधौ ॥ ७१ ॥

173. आस्रवहेतुर्मिथ्यात्वाविरतिकषाययोगकाः पञ्च ।
द्वादशकपञ्चविंशतिपञ्चादशभेदयुक्ताश्च ॥ ७२ ॥

174. कारणवशेन गाढं लग्नं कर्मोग्रदुःखजलपूर्णे ।
भ्रमयति संसाराब्धौ सुचिरं कालं तु जन्तुगणम् ॥ ७३ ॥

175. प्राणाश्रितकर्मवशाद् दुःपरिणामा भवन्ति तेभ्योऽन्यत् ।
बध्नाति दुरितमेवं बीजाङ्कुररूपतास्रवणे ॥ ७४ ॥

। इत्यास्रवानुप्रेक्षा ।

176. संसारवारिराशेस्तरणेऽवान्तरसमुद्भवाभ्युदय– ।
प्राप्तौ च कारणं स्यात्संवरणं जन्तुनिवहस्य ॥ ७५ ॥

177. यद्वदनास्रवपोतो वाञ्छितदेशं भृशं समाप्नोति ।
तद्वदनास्रवजीवो वाञ्छितमुक्तिं समाप्नोति ॥ ७६ ॥

178. संवरहेतुः सम्यग्दर्शनसंयमकषायरहितत्वम् ।
योगनिरोधास्तेषां भेदा वेद्याः सदागमतः ॥ ७७ ॥

179. मिथ्यात्वास्रवजानां मार्गाः सम्यक्त्वदृढकवाटौघैः ।
अविरत्यास्रवजानां वर्त्मानि व्रतमहापरिघैः ॥ ७८ ॥

180. क्रोधाद्यास्रवजानां द्वाराण्यकषायभावफलकाभिः ।
योगास्रवजानां प्रणिरुध्यन्तेऽयोगतावृत्या ॥ ७९ ॥ युग्मम् ॥

। इति संवरानुप्रेक्षा ।

181. पूर्वोपार्जितकर्मप्रविगलनं निर्जरा विनिर्दिष्टा ।
सा द्विविधा ज्ञेया स्यादुदयोत्थोदीरणोत्था च ॥ ८० ॥
182. उदयोत्था संसृतिगतजीवानां सर्वदैव सर्वेषाम् ।
ज्ञानावरणादीनां स्थितिजे काले परिसमाप्ते ॥ ८१ ॥

183. कालेऽप्यपरिसमाप्ते परिणामप्रमहावकृष्टानाम् ।
कर्माणूनां भवति ह्युदीरणोत्था द्विभेदा सा ॥ ८२ ॥
184. देशसकलाभिधाभ्यां देशाख्यानायोरनेकविधा ।
सकला तपसा महता दुरितानां निर्जरा भवति ॥८३॥ युग्मम् ॥

185. कालोपायाभ्यां फलपाकः संदृश्यते यथागेषु ।
कालोपायाभ्यां फलपाकः कर्मसु तथा भवति ॥ ८४ ॥

। इति निर्जरानुप्रेक्षा ।

186. अभ्युदयजनिःश्रेयससंभवसौख्येषु यः सदा सत्त्वम् ।
*धारयति सोऽत्र धर्मोऽहिंसादिकलक्षणोपेतः ॥ ८५ ॥*
187. स द्विविधः सागारोऽनगाराख्यानभेदतस्तत्र ।
प्रथमोऽप्येकादशधा दशधा प्रविभज्यते ह्यन्यः ॥ ८६ ॥
188. दृष्टिव्रतसामायिकपूर्वाः प्रथमस्य सम्यगवगम्याः ।
भेदा ह्युपासकाध्ययनोदितरूपेण विद्भिरमी ॥ ८७ ॥

189. स्युः क्षान्तिमार्दवार्जवसत्यत्यागादयो द्वितीयस्य ।
भेदा दश विज्ञेया ह्याचाराङ्गोक्तविधिनैव ॥ ८८ ॥
190. धर्मो बन्धुर्जगतां धर्मो मित्रं रसायनं धर्मः ।
स्वजनपरिजनसमूहो धर्मो धर्मो निधिनिधानम् ॥ ८९ ॥
191. धर्मः कल्पमहीजो धर्मश्चिन्तामणिश्च कामदुहः ।
धेनुर्धर्मोऽचिन्त्यं रत्नं धर्मो रसो धर्मः ॥ ९० ॥

। इति धर्मानुप्रेक्षा ।

192. बोधिस्तत्त्वार्थानां श्रद्धानं विशदबोधसंवृद्धम् ।
दुर्लभमेतद्यत्तत्प्रयत्नमस्मिन् सदा कुर्यात् ॥ ९१ ॥
193. पञ्चेन्द्रियता नृत्वं स्वायुः कुलदेशजन्ममारोग्यम् ।
रूपबलबुद्धिसत्त्वं विनयो बुधसेवनाश्रवणम् ॥ ९२ ॥
194. युक्तायुक्तविवेको युक्तिग्रहणं च धारयिष्णुत्वम् ।
चेत्येतान्यतिदुर्लभतमानि बाहुल्यतोऽन्येषाम् ॥ ९३ ॥ युग्मम् ॥
195. लब्धेषु तेषु नितरां बोधिर्दुर्लभतया विशुद्धतमा ।
कुपथाकुले हि लोके यस्माद्बलिनः कषायाश्च ॥ ९४ ॥
196. इत्यतिदुर्लभरूपां बोधिं लब्ध्वा यदि प्रमादी स्यात् ।
संसृतिभीमारण्ये भ्रमति वराको नरः सुचिरम् ॥ ९५ ॥
197. पतिता बोधिः सुलभा नो पश्चात्सुमहतापि कालेन ।
पतितमनर्घ्यं रत्नं सलिलनिधावन्धकार इव ॥ ९६ ॥

। इति बोधिदुर्लभानुप्रेक्षा ।

198. आकाशस्फटिकमणिज्योतिर्वा निश्चलं कषायाणाम् ।
प्रशमक्षयजं शुक्लध्यानं कर्माटवीदहनम् ॥ ९७ ॥
199. स पृथक्त्ववितर्कान्वितवीचारप्रभृतिभेदभिन्नं तत् ।
ध्यानं चातुर्विध्यं प्राप्नोतीत्याहुराचार्याः ॥ ९८ ॥
200. अर्थेष्वेकं पूर्वश्रुतजनितज्ञानसंपदाश्रित्य ।
त्रिविधात्मकसंक्रान्त्या ध्यायत्याद्येन शुक्लेन ॥ ९९ ॥
201. वस्त्वेकं पूर्वश्रुतवेदीप्रव्यक्तमाश्रितो येन ।
ध्यायति संक्रमरहितं शुक्लध्यानं द्वितीयं तत् ॥ १०० ॥
202. कैवल्यबोधनोऽर्थान् सर्वांश्च सपर्ययांस्तृतीयेन ।
शुक्लेन ध्यायति वै सूक्ष्मीकृतकाययोगः सन् ॥ १०१ ॥
203. शैलेशितामुपेतो युगपद्विश्वार्थसंकुलं सद्यः ।
ध्यायत्यपेतयोगो येन तु शुक्लं चतुर्थं तत् ॥ १०२ ॥

204. आद्येष्वार्तध्यानं षट्स्वपि रौद्रं च पञ्चसु गुणेषु ।
धर्ममसंयतसम्यग्दृष्ट्यादिषु भवति हि चतुर्षु ॥ १०३ ॥

204*1 उक्तं च ।

तत्त्वज्ञानमुदासीनमपूर्वकरणादिषु ।
शुभाशुभमलाभावाद्विशुद्धं शुक्लमभ्यधुः ॥ इति ॥

205. शान्तकषाये प्रथमं क्षीणकषाये द्वितीयशुक्लं तु ।
भवति तृतीयं योगिनि केवलिनि चतुर्थमपयोगे ॥ १०४ ॥

206. आर्तध्यानविकल्पा नयन्ति तिर्यग्गतिस्तु देहभृतः ।
रौद्रध्यानविभेदा नरकगतीस्तीव्रपापरतान् ॥ १०५ ॥

207. धर्मध्यानविशेषाद् देवगतिं प्रापयन्त्यनेकविधाम् ।
शुक्लध्यानोत्कर्षाः सिद्धगतिं शाश्वतात्मसुखाम् ॥ १०६ ॥

208. दुःपरिणामसमुद्भवनिमित्तनिःशेषवस्तुसंत्यागः ।
व्युत्सर्गः स द्विविधो बाह्याभ्यन्तरजभेदेन ॥ १०७ ॥

209. क्षेत्रादिदशत्यागो बाह्यो व्युत्सर्ग इति सदा गद्यः ।
मिथ्यात्वादिचतुर्दशसंत्यागोऽभ्यन्तरोद्भूतः ॥ १०८ ॥

210. अभ्यन्तरजातत्वादभ्यन्तरकर्मदोषनिर्हरणात् ।
अभ्यन्तरसंज्ञं स्यादुक्तमिदं षड्विधतपस्तु ॥ १०९ ॥

॥ इति सम्यक्तप-आराधना ॥ ४ ॥

211. गुणिनः पञ्चविकल्पा ह्यर्हत्सिद्धादिसार्थनामधराः ।
स्युरुपेयोपायात्मकदृग्बोधचरित्रसुतपांसः ॥ १ ॥

212. विनिहतघातिचतुष्का नवकेवललब्धिजनितपरमात्म- ।
व्यपदेशा दिव्यध्वनिनिरूपिताशेषतत्त्वार्थाः ॥ २ ॥

213. त्रिभुवनपतिभिरभिष्टुतनिजयशसोऽद्भुतविहरणास्थानाः ।
देहप्रभृतिसुविभवाः सकलात्मानः स्युरर्हन्तः ॥ ३ ॥ युग्मम् ॥

214. निर्गलितसिक्थमूषाभ्यन्तररूपोपमस्वकाकृतयः ।
स्वल्पोनचरमदेहसमाना ध्रुवनिष्कलात्मानः ॥ ४ ॥
215. अष्टविधकर्मरहिताः स्वस्थीभूता निरञ्जना नित्याः ।
स्वष्टगुणाः कृतकृत्या लोकाग्रनिवासिनः सिद्धाः ॥ ५ ॥ युग्मम् ॥
216. शिष्यानुग्रहनिग्रहकुशलाः कुलजातिदेशसंशुद्धाः ।
षट्त्रिंशद्गुणयुक्तास्तात्कालिकविश्वशास्त्रज्ञाः ॥ ६ ॥
217. आचारं पञ्चविधं भव्यानाचारयन्ति ये नित्यम् ।
शक्त्याचरन्ति च स्वयमाचार्यास्ते मते जैने ॥ ७ ॥ युग्मम् ॥
218. व्रतसमितिगुप्तिसंयमशीलगुणोज्ज्वलविभूषणोपेताः ।
देशकुलादिविशुद्धा विजितकषायादिरिपुवर्गाः ॥ ८ ॥
219. स्वपरसमयागमानां व्याख्यानरताः स्वशक्तिसारेण ।
भव्याम्बुजवनदिनपाः भवन्त्युपाध्यायनामानः ॥९॥ युग्मम् ॥
220. मूलोत्तराभिधानैरखिलगुणैः शासनप्रकाशकराः ।
काले द्वितीयकेऽपि प्रवर्तमानाः प्रवरशीलाः ॥ १० ॥
221. सिंहगजवृषभमृगपशुमारुतसूर्याब्धिमन्दरेन्दुमणि- ।
क्षित्युरगाम्बरसदृशाः परमपदान्वेषिणो यतयः ॥ ११ ॥

। इत्याराध्यस्वरूपम् ।

222. उपशमवेदकसम्यग्दर्शनभाजो विशुद्धपरिणामाः ।
तद्योग्यगुणा जीवाः सम्यक्त्वाराधका ज्ञेयाः ॥ १२ ॥
223. मत्यादिच्छद्मस्थज्ञानसमेतास्तदुचितगुणवन्तः ।
ज्ञानाराधकसंज्ञा भवन्ति सुविशुद्धपरिणामाः ॥ १३ ॥
224. देशविरतादिनष्टकषायान्ता वर्धमानशुभलेश्याः ।
शीलगुणभूषितास्ते चारित्राराधका ज्ञेयाः ॥ १४ ॥
225. देशविरतादिनष्टकषायान्ताः स्वोचितात्तमाचरणाः ।
संशुद्धचित्तयुक्तास्तपसो ह्याराधका गम्याः ॥ १५ ॥

226\. दर्शनमाराधयता ज्ञानं आराधितं भवेन्नियमात् ।
ज्ञानं त्वाराधयता भजनीयं दर्शनं विद्यात् ॥ १६ ॥

227\. सम्यग्दर्शनभाजा ज्ञानं भावात्मकं सदा ह्यस्ति ।
द्रव्यात्मकं च तस्मात्पूर्वार्धं कथितमाचार्यैः ॥ १७ ॥

228\. मिथ्यादृष्टौ च यतो द्रव्यश्रुतमस्ति तत्समालोक्य ।
शुद्धनयेनोक्तं तत्पश्चार्धं सूरिभिस्तु ततः ॥ १८ ॥

229\. शुद्धनयाद्विज्ञानं मिथ्यादृष्टेर्भवन्ति चाज्ञानम् ।
तस्मान्मिथ्यादृष्टिर्ज्ञानस्याराधको नैव ॥ १९ ॥

230\. संयममाराधयता तपः समाराधितं भवेन्नियमात् ।
आराधयता हि तपश्चारित्रं भवति भजनीयम् ॥ २० ॥

231\. यस्माच्चारित्रवतस्तनुचेतोदर्परोधरूपतपः ।
संलक्ष्यते हि तस्मात्पूर्वार्धं विद्भिरुपदिष्टम् ॥ २१ ॥

232\. तनुचेतोदर्पहरं तपोऽस्त्यसंयमवतोऽप्यशुद्धनयात् ।
यत्तत्समुक्तमार्यैरार्याः पश्चार्धमाचार्यैः ॥ २२ ॥

233\. सम्यग्दृशोऽप्यविरतस्यास्ति तपो नैव शुद्धनयदृष्ट्या ।
तनुचेतोदण्डनमपि पूर्वार्जितपापफलमेतत् ॥ २३ ॥

234\. आराधयता चरितं समस्तमाराधितं भवेन्नियमात् ।
आराधयतां शेषं चरितं भजनीयमित्याहुः ॥ २४ ॥

235\. शुद्धाशुद्धनयद्वयमाश्रित्यात्यन्तमागमे निपुणाः ।
कथयन्त्वस्याभावं ज्ञात्वार्या ये गुणसमग्राः ॥ २५ ॥

। आराधकजनस्वरूपम् ।

236\. शङ्कादिदोषसंकुलसंत्यागश्चेतसा सदाभ्यासः ।
निःशङ्कादिगुणानां सम्यक्त्वाराधनोपायः ॥ २६ ॥

237\. अक्षरहीनाध्ययनाद्यपोहनं ज्ञानभावनाद्यमपि ।
कालाद्यध्ययनयुतं ज्ञानस्याराधनोपायः ॥ २७ ॥

238. दुर्लेश्याध्यानव्रतकषायदण्डप्रमादमदशल्याः ।
संयमगारवभयसंज्ञादिकदोषावलीत्यागः ॥ २८ ॥

239. व्रतसमितिगुप्तिसंयमसल्लेश्याध्यानभावनाधर्म- ।
शुद्ध्यादिगुणाभ्यासश्चारित्राराधनोपायः ॥ २९ ॥

240. द्वाविंशतिभेदपरीषहविजयः सत्त्वभावनादीनाम् ।
अभ्यासश्च भवेदिह तपसो ह्याराधनोपायः ॥ ३० ॥

। इत्याराधनोपायाः ।

241. आराधनाचतुष्कप्रभवं फलमपि चतुर्विधं भवति ।
तत्रैवैकं द्विविधं त्वमुख्यमुख्यप्रभेदेन ॥ ३१ ॥

242. एकेन्द्रियजात्यादिष्वनुद्भवः संभवस्तु नाकादि- ।
निलयेष्वमुख्यफलमिह सम्यक्त्वाराधनायास्तत् ॥ ३२ ॥

243. निःशेषदुरितनिवहक्षयकारणमचलरूपतत्त्वरुचिः ।
क्षायिकसम्यक्त्वं तन्मुख्यफलं बुधजनाभीष्टम् ॥ ३३ ।

244. अज्ञानस्य विनाशनमवधिमनःपर्ययादिसंज्ञानो- ।
त्पत्तिश्चामुख्यफलं तद्ज्ञानाराधनोद्भूतम् ॥ ३४ ॥

245. क्रमकरणव्यवधानापेतत्रैकाल्यवर्ति विश्वार्थ- ।
द्योती केवलबोधो मुख्यफलं तत्र भवति भृशम् ॥ ३५ ॥

246. परिहाराहारर्द्धिकसूक्ष्मचरित्रादिबहुविधोऽभ्युदयः ।
सप्तर्द्ध्योऽप्यमुख्यं फलं चरित्रस्य जानीयात् ॥ ३६ ॥

उक्तं च—

बुद्धितवो वि य लद्धी विउव्वणलद्धी तहेव ओसहिया ।
रसबलअक्खीणा वि य लद्धीओ सत्त पण्णत्ता ॥

247. भवति यथाख्याताख्यं चरित्रं निःशेषवस्तुसमभावम् ।
मुख्यफलं तद्विद्याच्चारित्राराधनाप्रभवम् ॥ ३७ ॥

248. सम्यग्दृशि देशयतौ विरतेऽनन्तानुबन्धिविनियोगे ।
दर्शनमोहक्षपके कषायशमके तदुपशान्ते ॥ ३८ ॥

249. क्षपके क्षीणकषाये जिनेष्वसंख्येयसंगुणश्रेण्या ।
निर्जरणं दुरितानां तपसो मुख्यं फलं भवति ॥ ३९ ॥ युग्मम् ॥
250. अतिशयमात्मसमुत्थं विषयातीतं च निरुपममनन्तम् ।
ज्ञानमयं नित्यसुखं तपसो जातं तु मुख्यफलम् ॥ ४० ॥

। इत्याराधनाफलम् ।

251. छद्मस्थतया यस्मिन् यदि बद्धं किंचिदागमविरुद्धम् ।
शोध्यं तद् धीमद्भिर्विशुद्धबुद्ध्या विचार्य पदम् ॥ ४१ ॥
252. श्रीरविचन्द्रमुनीन्द्रैः पनसोगेग्रामवासिभिर्ग्रन्थः ।
रचितोऽयमखिलशास्त्रप्रवीणविद्वन्मनोहारी ॥ ४२ ॥

॥ इत्याराधनासमुच्चयं समाप्तम् । इति ॥

# श्लोकानुक्रमणिका


| | | | |
|---|---|---|---|
| अक्षरजमनक्षरजं | ६७ | अर्थानां याथात्म्या- | ८० |
| अक्षरहीनाध्ययना- | २३७ | अर्थेष्वेकं पूर्व- | २०० |
| अज्ञानस्य विनाशन- | २४४ | अवधिज्ञानात्पूर्वं | ४६ |
| अतिशयमात्मसमुत्थं | २५० | अविरतसम्यग्दृष्टया | २९ |
| अत्युष्णशीतकर्कश- | १६१ | अविरतसम्यग्दृष्टयाद्या | ५१ |
| अथ मिथ्यात्वोदयगो | २० | अशुचितमशुक्रशोणित- | १६७ |
| अथवा द्वित्रिचतुःपञ्चादि- | ५८ | अष्टविधकर्मरहिताः | २१५ |
| अथवा द्वेधा दशधा | ३७ | अस्थिघटितं सिरा- | १६८ |
| अथ सम्यक्त्वं प्राप्तः | २४ | आकाशस्फटिकमणि- | १९८ |
| अथ सम्यङ्मिथ्यात्वं | २२ | आशेत्यागमसंज्ञा | १२२ |
| अध्रौव्याशरणैक- | १३२ | आचारादिविकल्पाद् | ६८ |
| अन्तर्मुहूर्तकालं | २३ | आचारं पञ्चविधं | २१७ |
| अन्तर्मुहूर्तकालं | २५ | आद्यचरित्रद्वितयं | ९६ |
| अन्तर्मुहूर्तभङ्ग- | १०१ | आद्ये चरिते स्यातां | ९५ |
| अन्तर्मुहूर्तमपरं | १०० | आद्येषु त्रिषु चरिते | ९८ |
| अन्तर्मुहूर्तसमयो | ९९ | आद्येष्वार्तध्यानं | २०४ |
| अन्यमनोगतविषयः | ८१ | आद्यं विज्ञानत्रय- | ७९ |
| अन्योऽज्ञोऽयं प्राणी | १४९ | आर्तध्यानविकल्पा | २०६ |
| अभ्यन्तरजातत्वा- | २१० | आत्मन्येकीभूतः | १३८ |
| अभ्यन्तरं च षोढा | ११० | आप्तागमतत्त्वार्थ- | ४ |
| अभ्युदयजनिःश्रेयस- | १८६ | आप्तोक्ता वागागम- | ५ |
| अरतिर्दुःखं तस्यां | ११७ | आराधनाचतुष्क- | २४१ |

| | | | |
|---|---|---|---|
| आराधयता चरितं | २३४ | कालो द्वितीयगुणिनो | १८ |
| आराध्याराधकजन- | २ | कालेपायाभ्यां फल- | १८९ |
| आस्रवहेतुर्मिथ्यात्वा- | १७३ | किंजल्कपुञ्जपिञ्जर- | १४३ |
| इतरत्रिकसंहनन- | ११६ | केवलदर्शनबोधौ | ४९ |
| इत्यतिदुर्लभरूपां | १९६ | केवलबोधनविषय- | ४७ |
| इन्द्रादिनिलिम्पाना- | १३५ | कैवल्यबोधनोऽर्थान् | २०२ |
| इन्द्रियमनसोर्दर्प- | १०२ | क्रमकरणव्यवधाना- | २४५ |
| इन्द्रियमनसां षण्णां | ५६ | क्रोधाद्यास्रवजानां | १८० |
| इन्द्रियमनोभिरभिमुख- | ५५ | कृतदोषस्य निवृत्ति | १११ |
| उत्कृष्टजघन्यद्वय- | ७७ | क्षपके क्षीणकषाये | २४९ |
| उत्तमसंहननस्यैकाग्रज- | ११५ | क्षपकश्रेणीसदृश- | ३१ |
| उत्पद्यतेऽथ मिथ्या- | ७५*१ | क्षायिकसम्यग्दर्शन- | ३२ |
| उत्पद्यते हि वेदक | ३३ | क्षायोपशमिकमन्यद् | ९७ |
| उत्सर्पणावसर्पण- | १५५ | क्षुत्तृड्भीकुभ्राग- | ६ |
| उदयोत्था संसृतिगत- | १८२ | क्षेत्रादिदशत्यागो | २०९ |
| उपशमकश्रेणिं तेना- | २८ | गुणकारणजं तिर्यङ् | ७३ |
| उपशमवेदकसम्यग्- | २२२ | गुणकारणस्य नाभेः | ७५ |
| ऋजुधीपर्ययबोधन- | ८२ | गुणिनः पञ्चविकल्पा | २११ |
| एकद्वित्रिचतुःपञ्चेन्द्रिय- | १६३ | चक्रधरादिनराणां | १३६ |
| एकाक्षरादिवृद्ध्या | ६४ | चक्षुर्ज्ञानात्पूर्वं | ४४ |
| एकेन्द्रियजात्यादि- | २४२ | चक्षुर्मनसोर्नास्ति | ५७ |
| एको गर्भार्भकनव- | १४५ | चतुरिन्द्रियादिनष्ट- | ५० |
| एतानि ज्ञानानि | ८४ | छद्मस्थतया यस्मिन् | २५१ |
| कारणवशेन गाढं | १७४ | छेदनभेदनताडन- | १६२ |
| कार्येण जनस्य जनः | १५० | जन्मसमुद्रे बहुदोष- | १७१ |
| कालेऽप्यपरिसमाप्ते | १८३ | जलबुद्बुदेन्द्रचाप- | १३९ |

| | |
|---|---|
| जाग्रदवस्थावस्थः | १३ |
| जानाति यत्पदार्थान् | ५३ |
| ज्ञानादनन्तगुणविज्ञानं | ६३ |
| ज्ञानादिगुणप्रकृतिक- | १५१ |
| ज्ञानावरणादीना- | १२३ |
| जीवाजीवौ धर्माधर्मौ | ९ |
| जीवाद्यर्था यस्मिन् | १५८ |
| तत्कालस्यान्तर्यदि | १७ |
| तच्चक्षुरादिदर्शन- | ४३ |
| तद्वक्त्रात् पूर्वापर- | ८ |
| तद्वै मतिश्रुतावधि- | ५४ |
| तनुश्चेतोदर्पहरं | २३२ |
| तत्राराध्यं गुणगुणि- | ३ |
| तत्त्वज्ञानमुदासीन- | २०४*१ |
| तत्सरागं विरागं च | १०*१ |
| तस्योपरि षड्वृद्धिषु | ६२ |
| तीर्थकृदिन्द्ररथाङ्ग- | १३० |
| तेनूपशमजसम्यग् | ११ |
| त्रिकरणशुद्धिं कृत्वा | १४ |
| त्रिकरणशुद्ध्या नीचै- | ११२ |
| त्रिकरण्या दृग्मोह- | २७ |
| त्रिभुवनपतिभिरभिष्टुत- | २१३ |
| त्रिविधविकल्पसमन्वित- | ८९ |
| त्रिंशद्वर्षाद् योगी | ९० |
| त्रैलोक्यस्य च लाभा- | ४० |
| दर्शनमाराधयता | २२६ |
| दर्शननष्टो नष्टो | ३९ |
| दर्शयति यत्पदार्था- | ४२ |
| दशचतुरेकं सप्तदशा | १२७ |
| दुरितानां तु शुभाशुभ- | १२९ |
| दुर्लेश्याध्यानव्रत- | २३८ |
| दुष्कर्मपाकसंभव- | १४० |
| दुःपरिणामसमुद्भव- | २०८ |
| देशविरतादिनष्ट- | २२४ |
| देशविरतादिनष्ट- | २२५ |
| देशसकलाभिधाभ्यां | १८४ |
| देशावधिविज्ञानं | ७१ |
| दोषास्तेषां हन्ता | ७ |
| दृक्पूर्व एव बोधः | ४८ |
| दृग्बोधनादिगुणरूपा- | १४७ |
| दृष्टिव्रतसामयिक- | १८८ |
| द्रव्यं क्षेत्रं कालं | ७२ |
| द्रव्यक्षेत्रादिवशात् | १०४ |
| द्वादशधा गदितानुप्रेक्षा | १३१ |
| द्वाविंशतिभेदपरीषह- | २४० |
| द्वित्रिचतुःपञ्चादि- | २१ |
| धर्मः कल्पमहीजो | १९१ |
| धर्मध्यानविशेषाद् | २०७ |
| धर्मसहचारिपुरुषो | १२१ |
| धर्मो बन्धुर्जगतां | १९० |
| ध्रौव्याध्रौव्याद्यात्म- | १३३ |
| नरकभवमन्यायुष्या- | १५६ |

निर्गलितसिक्थमूषा २१४
निर्वाणराज्यलक्ष्म्याः ४१
निर्वृतियोग्ये क्षेत्रे ३०
निःशेषदुरितनिवह- २४३
निष्पतदन्तर्ज्योति- ५९
पञ्चविधे संसारे १५२
पञ्चेन्द्रियता नृत्वं १९३
पतिता बोधिः सुलभा १९७
परमावधिविज्ञानं ७६
परिहारमनःपर्यय- १६
परिहारर्द्धिसमेतः १२
परिहाराहारर्द्धिक- २४६
पर्यायाक्षरपदसंघातादि- ६०
पुद्गलपरिवर्तार्धे ३६
पूर्वोपार्जितकर्म- १८१
प्रथमतृतीये कालः ५२
प्रागार्जितकर्मवशाद्- १७५
प्राणीन्द्रियेषु षड्विध- ८६
प्रादेशिकं तु गौण्यं ७४
बद्धायुष्यचतुष्को ३५
बन्धादिभिर्विकल्पै- १२४
बहुजात्याश्वमदद्विप- १४२
बाह्यजनज्ञातत्वाद्- १०९
बाह्यं षडात्मकं स्यात् १०३
बुद्धितवो वि य लद्धी २४६*१
बोधिस्तत्त्वार्थानां १९२
भवति यथाख्याताख्यं २४७
भिक्षासमुत्थकांक्षा १०७
भुवनत्रितये पुण्योदर्कज- १३४
मक्षिकपत्रसमानं १७०
मतिजश्रुतजे ज्ञाने ६९
मत्यादिछद्मस्थज्ञान- २२३
मर्त्यक्षेत्रसमाने १६६
मनुजेषु पापपाकात् १६४
मातृपितृपुत्रपौत्र- १४८
मिथ्यात्वास्रवजानां १७९
मिथ्यादृष्टिर्भव्यो १२
मिथ्यादृष्टौ च यतौ २२८
मूलोत्तराभिधानै- २२०
मोहानुदयादेकाकार- ९४
यत्तु जघन्यं ज्ञानं ६९
यत्साम्यज्ञानं तत्स्यात् १०६
यद्वत्सास्रवपोतो १७२
यद्वदनास्रवपोतो १७७
यद्वत् शरणमुग्र- १४४
यस्माच्चारित्रवतः २३१
युक्तायुक्तविवेको १९४
रसाद् रक्तं ततो मांसं १६७*१
रुद्रः क्रूरस्तस्मिन् ११९
रूपिद्रव्यनिबद्धं ७०
रूपं कान्तिस्तेजो १३७
लब्धेषु तेषु नितरां १९५

| | | | |
|---|---|---|---|
| लांतवकल्पे तेरस | २५*१ | स द्विविधः सागारो | १८७ |
| वस्त्वेकं पूर्वश्रुत- | २०१ | सप्ताधो नरकाः स्युः | १६० |
| वातं पित्तं तथा | १६७*२ | सप्ताष्टषोडशैकैकं | १२८ |
| विनिहतघातिचतुष्का | २१२ | स पृथक्त्ववितर्कान्वित- | १९९ |
| विपुलमनःपर्ययमपि | ८३ | सम्यग्दर्शनबोधन- | १ |
| विविधसुखदुःखकारण- | १४६ | सम्यग्दर्शनचिह्नं | १० |
| वृक्षस्य यथा मूलं | ३८ | सम्यग्दर्शनभाजा | २२७ |
| वेदकसम्यग्दृष्टिः | २६ | सम्यग्दृशि देशयतौ | २४८ |
| व्यापदि यत् क्रियते तत् | ११३ | सम्यग्दृशोऽप्यविरत- | २३३ |
| व्रतसमितिगुप्तिसंयम- | ८८ | सर्वत्र जगत्क्षेत्रे | १५४ |
| व्रतसमितिगुप्तिसंयम- | २१८ | सर्वप्रकृतिस्थित्यनु- | १५७ |
| व्रतसमितिगुप्तिसंयम- | २३९ | सर्वावधिविज्ञानं | ७८ |
| शङ्कादिदोषसंकुल- | २३६ | सर्वेऽपि पुद्गलाः | १५३ |
| शान्तकषाये प्रथमं | २०५ | सामान्यविशेषात्मक- | ८५ |
| शिष्यानुग्रहनिग्रह- | २१६ | सावद्ययोगविरतिः | ८७ |
| शीलेशितामुपेतो | २०३ | सासादनस्य नरकेषु | ११ |
| शुचिसुरभिपूतजल- | १६९ | सूक्ष्मीकृते तु लोभ- | ९३ |
| शुद्धनयाविज्ञानं | २२९ | सैकद्विषोडश | १२६ |
| शुद्धाशुद्धचरित्रे- | १६५ | संख्येयाक्षरजनितं | ६५ |
| शुद्धाशुद्धनयद्वय- | २३५ | संघातादिज्ञाना- | ६६ |
| शुद्धं वा मिश्रं वा | १५ | संयममाराधयता | २३० |
| शेषेन्द्रियार्थबोधात् | ४५ | संयमविनाशभीरु- | ९१ |
| श्रीरविचन्द्रमुनीन्द्रैः | २५२ | संवरहेतुः सम्यग् | १७८ |
| षट्सु वधः पृथ्वीषु | ३४ | संसारवारिराशेः | १७६ |
| षोडशकपञ्चविंशति | १२५ | सिंहगजवृषभमृगपशु- | २२१ |
| | | स्त्रीपश्वादिविवर्जित- | १०८ |

| | | | |
|---|---|---|---|
| स्यात्सुपतिष्ठकाकृति- | १५९ | स्वपरसमयागमानां | २१९ |
| स्युः क्षान्तिमार्दवार्जव- | १८९ | स्वर्गो दुर्गं वप्रं | १४१ |
| स्वध्ययनमागमस्य | ११४ | स्वेष्टवियोगादौ सति | ११८ |
| स्वपरव्याप्तिरहितं | १०५ | हिंसादीनां बाह्ये | १२० |


●

# उद्धृतपद्यानां सूची


| | | | |
|---|---|---|---|
| उत्पद्यतेऽथ मिथ्या | ७५*१ | रसाद् रक्तं ततो मांसं | १६७*१ |
| तत्त्वज्ञानमुदासीन- | २०४*१ | लांतवकप्पे तेरस | २५*१ |
| तत्सरागं विरागं च | १०*१ | वातं पित्तं तथा | १६७*२ |
| बुद्धितवो वि य लद्धी | २४६*१ | | |


●

श्री पञ्चगुरुभ्यो नमः

श्री-गुरुदास-विरचितः

# योगसारसंग्रहः

# Prefatory Note

Many Jaina authors have dealt with the topic of Yoga or Dhyāna; and some of their works contain in their titles the term Yoga ( H. D. Velankar : Jinaratnakośa, Poona 1945, pp. 321 f. ). There are other works like the Jñān-ārṇava, Tattvānuśāsana etc. which also deal with Yoga.

Here is presented a small text in Sanskrit, dealing with Yoga. In the transcript the opening title is Yogasāram, but the concluding colophon describes it as Yogasārasaṃgrahaḥ. In the light of the author's own statement ( see verses 36, 156–7 ) it is reasonable that Yogasārasaṃgraha is a fitting title for this work. Some works of similar names are already listed in the Jinaratnakośa; and the Yogasāra standing there against the name of Gurudāsa ( based on the information of the lists of Mss. preserved in the Ailaka Pannalal Jaina Sarasvati Bhavana, Bhuleshvar, Bombay ) is obviously identical with the work presented here.

The text of Yogasārasaṃgraha ( YSS ), published here, is based on an indifferently written transcript which the late lamented Pt. Nathu-

ramaji Premi had given me with a desire that it might be published in the Māṇikachandra D. Jaina Granthamālā. This transcript I presented to the Jaina Saṃskṛti Saṃrakṣaka Saṃgha, Sholapur. A copy of it was given to Pt. Jugalkishore Mukthar who expressed to me that this tiny work was interesting and sufficiently important. The transcript contains a number of scribal lapses and obscure contexts. The text is carefully presented here after duly correcting the copyist's slips; but wherever I found that my emendations might not be acceptable to all, I have given, in the foot-notes, the actual readings of the transcript to enable others to suggest better emendations. I am thankful to Pt. Jinadas Shastri, Sholapur, for some of the emendations suggested by him.

The name of the author is Gurudāsa who describes himself ( verse no. 158 ) as the *vatsa* of Śrīnandinandi, as the disciple of Śrīnandīguru and as the *sūnu* or son of Sarasvatī. It is difficult to interpret some of these terms, till some more independent sources are available. All that can be definitely stated at this stage is that Gurudāsa is the author and that he was a pupil of Śrīnandiguru.

In the Jainagrantha-praśasti-saṃgraha ( Part I, Vīrasevāmandira, Delhi 1954, see nos. 84–5 on pp. 119, and Intro. pp. 57–8 ) the opening ( 5 verses ) and concluding ( verses 156–58, but perhaps wrongly numbered as 176–78 ) portions of this work are reproduced. The concluding colophon calls this work Yogasaṃgrahasāraḥ and attributes its authorship to Śrīnandiguru. The colophon, if I understand the context correctly, seems to go against the contents of the concluding verse ( no. 158 ). The whereabouts of the basic Ms. are not noted there : any way the oolophon needs verification.

In this connection may be noted another work Prāyaścittacūlikā ( Mānikachandra D. J. Granthamālā. No. 3, Bombay 1920, pp. 104 ff. ). Its author also is Gurudāsa; but the commentary ( *vivaraṇa* ) on it is written by Śrīnandiguru, obviously the author's teacher as noted in the concluding verse ( pravaraguru-girīndra-prodgatā vṛttir eṣā ). If we compare verse no. 166 of this Prāyaścitta text and verse no. 151 of YSS. which are quite identical, there remains no doubt that the author of these two works is one and the same Gurudāsa; and he is a pupil of Śrīnandiguru.

The YSS deals with the theory and practice of meditation, just in 158 verses, of which the first four are introductory and the last nine verses concluding Maṅgala. Dhyāna or meditation is the veritable means of Mokṣa, and hence Bhavyas strive for its practice ( 5–6 ). The Dharma preached by Sarvajña is highly valuable, but one's negligent behaviour ( pramāda ) comes in the way of its practice ( 7 ). The mind of the house-holder is distracted by passions and pleasures; so only the great saints who have quitted the house, can practise Dhyāna ( 12–5 ). Only those saints who maintain Sāmya-bhāva, being above Rāga and Dveṣa, that can practise Dhyāna ( 31–2 ) which needs perfect control on mind, speech and body ( 35 ). Then Dhyāna is of four kinds : ārta, raudra, dharmya and śukla; and these are explained in details ( 37 ff. ). The Dhyeya or object of meditation is elaborated in details ( 61 ff. ): how it is to be concentrated on ( 71 ff. ), and how then results the destruction of Karmas ( 80 f. ). When the Yoga is Vītarāga, that is the highest meditation wherein the Paramātman in full effulgence is realised ( 85 ff. ). The twelve-fold reflections go to stabilise Dhyāna ( 98 f. ). When one is engrossed in oneself, the

potential Atman evolves into fullfledged Paramātman ( 121 f. ) through various subtle stages of spiritual meditation ( 124 f. ) : then one reaches ārhantya ( 132 ). Lastly, comes Nirvāṇa reaching which the Paramātman is all-knowledge etc., beyond description by words ( 142 f. ). Dhyāna is glorified as the best Saṃyama etc. ( 147 ); and it helps one to cross Saṃsāra. The author remarks that his composition is a digest of what he has studied and inherited from his teachers ( 150 ).

Though the date of the author is not known, the contents of this work seem to echo a good deal from the Jñānārṇava of Śubhacandra, Tattvānuśāsana of Rāmasena, śrāvakācāra of Amitagati etc.

The text presented here is based on a transcript of a single Ms. Any suggestions to improve it will be welcomed. It is hoped that the Index of verses will prove helpful in tackling certain chronological questions about this work.

Dhavalā
VIII, Rajarampuri,
Kolhapur : 14-10-65. A. N. Upadhye

— श्री —

# योगसारसंग्रहः[1]

1. भद्रं भूरिभवाम्भोधिशोषिणे दोषमोषिणे ।
जिनेशशासनायालं कुशासनविशासिने ॥ १ ॥
2. संयमोद्दाममारामश्रीगुरोः पादपङ्कजम् ।
वन्दे देवेन्द्रवृन्दोद्यन्मौलिमालाकरार्चितम् ॥ २ ॥
3. योगीन्द्रो रुन्द्रयोगाग्निदग्धकर्मेन्धनोऽङ्गिनाम् ।
विश्वज्ञो विश्वदृश्वास्तु मङ्गलं मङ्गलार्थिनाम् ॥ ३ ॥
4. सद्वाग्वृत्तपदन्यासवर्णालङ्कारहारिणी ।
सन्मार्गाङ्गी सदैवास्तु प्रसन्ना नः सरस्वती ॥ ४ ॥
5. यस्माद् ध्यानं बुधैरिष्टं साक्षान्मोक्षस्य साधनम् ।
अतो मोक्षार्थिभव्येभ्यस्तदेवास्माभिरुच्यते ॥ ५ ॥
6. वैराग्यं दशधा धर्मो ध्यानाभ्यासोऽपवर्गदः ।
अतो मुमुक्षवो भव्या यतन्ते ध्यानसाधने ॥ ६ ॥
7. सर्वज्ञोपज्ञमाप्यापि दुर्लभं धर्ममङ्गिनः ।
प्रमादाद्विप्रणश्यन्ति विचित्रा कर्मणां गतिः ॥ ७ ॥
8. सर्वसारं दुरावापं दुर्विज्ञेयं सुदुष्करम् ।
आत्मा [2]धर्ममवाप्योऽथ दग्धरात्रो विलम्बते ॥ ८ ॥
9. कर्मारणिसमुद्भूतकालानलकरालितम् ।
प्रमादमदिरोन्मत्तं जाज्वलीति जगत्त्रयम् ॥ ९ ॥

---

1. अथ योगसारम् । २. धर्मवाप्योवदग्धरात्रा विलम्बते ।

10. कालानलमहाज्वालाकलापपरिवारिताः ।
मोहान्धाः शेरते विश्वे परं जाग्रति योगिनः ॥ १० ॥
11. बोधशुद्धान्तरात्मानः प्रमादपरिवर्जिताः ।
उन्मूलयन्ति कर्माणि योगिनो ध्यानवायुना ॥ ११ ॥
12. कषायैरिन्द्रियैर्दुष्टैर्व्याकुलीक्रियते मनः ।
ततः कर्तुं न पार्येत भावना गृहमेधिभिः ॥ १२ ॥
13. वह्निना चेत्प्रचाल्येत[1] काठिन्यं काञ्चनादपि ।
स्वभावचपला भेत्ता [?] पुत्रदारादिभिर्न किम् ॥१३॥
14. संसारभीरुभिस्तस्मात्प्राणिभिर्मोक्षकाङ्क्षिभिः ।
गेहवासः परित्याज्यो धीरैर्ध्यानप्रसिद्धये ॥ १४ ॥
15. गेहवासे कुतः सौख्यमाशापाशविपाशिते ।
विषयामिषलुब्धानां मोहदावाग्निदीपिते ॥ १५ ॥
16. सर्वसंगविमुक्तानां संतोषामृतपायिनाम् ।
शर्मात्मकं सुखं यत्स्यात्कुतस्तद्भोगगृद्धितः ॥ १६ ॥
17. अध्यात्मजं निराबाधमात्मायत्तं च तद्ध्रुवम् ।
स्वर्गापवर्गदं पुंसां न तथा विषयात्मकम् ॥ १७ ॥
18. विषयामिषसेवायास्तृप्तिर्नैवोपजायते ।
केवलं पापबन्धः स्यात्मानादुःखखनिर्नृणाम् ॥ १८ ॥
19. रागान्धबुद्धयो जीवाः सौख्याशादिवशीकृताः ।
सुखानीव प्रपश्यन्ति विषयान्विषसंनिभान् ॥ १९ ॥
20. तदुद्भवमजानानो जनोऽन्यत्र समीप्सति ।
यदन्यत्र स्थितं वस्तु तदन्यत्र किमाप्यते ॥ २० ॥
21. आत्यन्तिकस्वभावोत्थानन्तज्ञानसुखः पुमान् ।

---

1. चेत्प्रचाल्येत ।

परमात्मा विटः[1] कन्तुरहो माहात्म्यमात्मनः ॥ २१ ॥

22. जानन्नपि न जानाति पश्यन्नपि न पश्यति ।
विषयेषु विषण्णात्मा शृण्वन्नपि शृणोति न ॥ २२ ॥

23. न वेत्ति किं करोमीति कामसंमूढमानसः ।
बालिशः शिशुवद्यद्व विधत्ते मेघमण्डलम् ॥ २३ ॥

24. तावदेव सुखी जीवो यावन्न स्निह्यति क्वचित् ।
स्नेहबन्धावनद्धस्य दुःखमेव पदे पदे ॥ २४ ॥

25. न दुःखं न सुखं किंचित्संसारे परमार्थतः ।
वासनावासितो जन्तुर्दुःखं सौख्यं च मन्यते ॥ २५ ॥

26. दुःखितः सुखिनं पश्यन्नात्मानं सुखवान्न किम् ।
अन्यथा वैपरीत्येन तस्मात्संकल्पजं द्वयम् ॥ २६ ॥

27. संकल्पोऽपि च जन्तूनां कारणं बन्धमोक्षयोः ।
वीतरागोऽपवर्गस्य सरागो बन्धकारणम् ॥ २७ ॥

28. इहातः परलोके च वाञ्छद्भिः सौख्यमुत्तमम् ।
ध्याने यत्नः प्रकर्तव्यस्तत्र चित्तनिरोधनम् ॥ २८ ॥

29. चित्तायत्तो व्रजेज्जीवः कृष्टा सूचीव सूत्रतः ।
गतिस्तत्र मतिर्यत्र तत्कुर्यान्मनसः क्षयम् ॥ २९ ॥

30. मनोरोधे भवेद्रुद्धं विश्वमेव शरीरिभिः ।
प्रायोऽसंवृत्तचित्तानां शेषरोधोऽप्यपार्थकः ॥ ३० ॥

31. तस्मान्मनोनिरोधाय रागद्वेषौ विवर्जयेत् ।
साम्यभावितभावानां ध्यानसिद्धिर्ध्रुवा भवेत् ॥ ३१ ॥

32. साम्यमेवादराद्भाव्यं किमन्यैर्ग्रन्थविस्तरैः ।
प्रक्रियामात्रमेवेदं वाङ्मयं विश्वमस्य हि ॥ ३२ ॥

---

१. विपः ।

33. साम्यादपि महाक्ष्वेडज्वरदुष्टजलग्रहाः ।
नियम्यन्तेऽपि क्रूराद्याः साम्याद्विज्ञायतेऽखिलम् ॥३३॥
34. एकचिन्तानिरोधो यस्तद्ध्यानं भावना परा ।
अनुप्रेक्षाऽथ चिन्ता वा तज्ज्ञैरभ्युपगम्यते ॥ ३४ ॥
35. छद्मस्थानामिदं ध्यानं भवेदन्तर्मुहूर्ततः ।
योगरोधो जिनेन्द्राणां कर्मौघध्वान्तभास्वताम् ॥ ३५ ॥
36. ध्याता ध्यानं तथा ध्येयं फलं चेति चतुष्टयम् ।
योगसंग्रहसारेऽस्मिन् गीयते योगिपुङ्गवैः ॥ ३६ ॥
37. आर्तं रौद्रं विदुर्धर्म्यं शुक्लं शुक्लामलाशयाः ।
चतुर्धा ध्यानमन्वर्थं प्रत्येकं तच्चतुर्विधम् ॥ ३७ ॥
38. विषादामर्षशान्त्यादि संक्षेपात्तस्य लक्षणम् ।
मैत्रीप्रमोदनाद्याः सद्भावना भवभेदिकाः ॥ ३८ ॥
39. संयोगे यद्यनिष्टस्य[1] समन्वाहरणं स्मृतेः ।
तद्वियोगार्थमाद्यार्तं मनोज्ञस्य विपर्ययात् ॥ ३९ ॥
40. स्याद्द्वितीयस्तृतीयश्च वेदनायां चतुर्थकम् ।
निदाने श्रावको ध्याता विरतो विरताश्रयः ॥ ४० ॥
41. फलं तिर्यग्गतिस्तस्य रौद्रे स्यान्नारकी गतिः ।
संयतासंयतो ध्याता सम्यग्दृष्टिरपीष्यते ॥ ४१ ॥
42. हिंसायामनृते स्तेये विषयेष्वथ रक्षणे ।
जीवस्योत्पद्यते शश्वत्कषायकलुषस्य तत् ॥ ४२ ॥
43. रागद्वेषान्ममत्वाद्वा ये मया हा विराधिताः ।
क्षाम्यन्तु जन्तवस्ते मे तेभ्यो मृष्याम्यहं पुनः ॥ ४३ ॥
44. मनसा वपुषा वाचा कृतकारितसंमतैः ।
रत्नत्रयभवं दोषं गर्हे निन्दामि वर्जये ॥ ४४ ॥

---

१. युविनिष्टस्य ।

45. मधुरोऽम्लः कटुस्तिक्तः कषायो लवणोऽपि च ।
अशनादिचतुर्भेदाहारस्त्यक्तो मयाधुना ॥ ४५ ॥

46. नाहं देवो मनुष्यो वा नैव तिर्यङ्न नारकः ।
सिद्ध एव विशुद्धात्मा शेषं कर्मविनिर्मितम् ॥ ४६ ॥

47. कर्मजं भावमुत्सृज्य संप्रपद्ये स्वभावजम् ।
आत्मैव केवलोऽहं मे ज्ञानदर्शनवैभवः ॥ ४७ ॥

48. एतामास्थां समास्थाय साम्यभावितभावनः ।
ध्यानमालम्ब्य ते धर्म्यं शुक्लं वाथ यथाबलम् ॥ ४८ ॥

49. सत्संयमधरो धीरः सत्संहतिरनाकुलः ।
परीषहचिदुत्साहिमुक्तदेहादिबन्धनः ॥ ४९ ॥

50. शून्यवेश्मगिरीन्द्रोरुगुहागह्वरमध्यगः ।
विविक्तविजनारण्यनिराबाधप्रदेशभाक् ॥ ५० ॥

51. सद्बोधवार्धिनिर्धौतशुद्धबुद्धिर्दयार्द्रधीः ।
वीतरागो महामोहमल्लघातजयोद्यतः ॥ ५१ ॥

52. यः प्रमत्ताप्रमत्ताख्यः सद्योजातः स्वरूपभृत् ।
ऊर्ध्वस्थितो निषण्णो वा पर्यङ्कादिभिरासनैः ॥ ५२ ॥

53. पर्यङ्कदेशमध्यस्थः प्रोत्तानकरकुड्मलः ।
ऋज्वायततनुः[1] शान्तो रौद्रार्तपरिवर्जितः ॥ ५३ ॥

54. समाहृत्येन्द्रियग्राममात्मार्थेऽभ्यस्तमानसम्[2] ।
ललाटमध्यविन्यस्तं मनः कृत्वा सुनिश्चलम् ॥ ५४ ॥

55. उत्सृजन्मन्दमुच्छ्वासं घोणाग्रनिहितेक्षणः ।
लेप्यचित्राकृतिर्धर्म्यं ध्यायेद् ध्यानं महामुनिः ॥ ५५ ॥

56. आज्ञापायविपाकानां विचितिः संस्थितेः क्रमात् ।
धर्म्यं ध्यानमिति प्रोक्तं केवलज्ञानलोचनैः ॥ ५६ ॥

---

१. ऋज्वायततनुः । २. स्वार्थेभ्यः समानसम् ।

57. त्रिकालगोचरानन्तगुणपर्यायसंयुतम् ।
वस्तुतत्त्वं जिनाम्नातं संमतं नस्तथैव सत् ॥ ५७ ॥
58. बन्धहेतून्कदापास्य रत्नत्रयविभूषणः ।
कर्मारातिचमूं भित्त्वा शिवं प्राप्स्यामि शाश्वतम् ॥ ५८ ॥
59. कष्टं कर्माष्टकं प्राप्य द्रव्यादिकचतुष्टयम् ।
शुभाशुभफलं दत्ते देहिनां भवभागिनाम् ॥ ५९ ॥
60. जीवाजीवादिभिर्भावैः स्थित्युत्पत्तिव्ययात्मभिः ।
संपूर्णोऽनादिसंसिद्धो लोकस्तालतरुस्थितिः ॥ ६० ॥
61. ध्येयं वस्तु द्विधा तच्च चेतनाचेतनात्मकम् ।
अशेषदोषनिर्मुक्तो देवः सकलनिष्कलः ॥ ६१ ॥
62. क्षीरवारिधिमध्यस्थं सहस्रदलमम्बुजम् ।
तत्रात्मानं सदोन्निद्रं ध्यायन्नन्तर्बहिर्मुहुः ॥ ६२ ॥
63. मूर्ध्नेन्दुमुक्तपीयूषवारिधारापरिप्लुतम् ।
अर्हन्निति शशाङ्काभं जपेद्बीजं विमुक्तये ॥ ६३ ॥
64. अष्टोत्तरशतं पूर्णं यो जपेदपराजितम् ।
मनोवाक्कायगुप्तोऽसौ प्रोषधं फलमश्नुते ॥ ६४ ॥
65. षोडशाक्षरविद्यायां स्यात्तदेव शतद्वये ।
त्रिंशत्या षट् सुवर्णेषु चतुःषष्ट्यां च वार्धिषु ॥ ६५ ॥
66. अकारं परमं बीजं जपेद्यः शतपञ्चकम् ।
प्रोषधं प्राप्नुयात्सम्यक् शुद्धबुद्धिरतन्द्रितः ॥ ६६ ॥
67. तस्यैवादिनमस्कारवर्णसप्तकमाजपेत् ।
योऽसावेकमनाः शश्वदश्नुते शाश्वतं शिवम् ॥ ६७ ॥
68. अ-सि-आ-उ-सा-बीजानि विश्वव्यापीनि तन्मनाः ।
जपन्ननारतं योगी सम्यग्बोधर्द्धिमृच्छति ॥ ६८ ॥

69. शरणोत्तममाङ्गल्यपदमन्त्रपदान्यपि ।
जपतां स्मरतां पुंसां मोक्षलक्ष्मीर्वशं व्रजेत् ॥ ६९ ॥

70. ललाटपट्टसंश्लिष्टं चन्द्रबिन्दुकलामलाम् ।
ईषत्प्राग्भारदेशीयां सुधाधाराम्रपाश्रितम् ॥ ७० ॥

71. ध्यायंस्त्रयोदशीं मात्रां महाबलमनाहतम् ।
घोणाग्रे ज्ञानमाप्नोति स्वभ्यासान्मृतकस्थितेः ॥ ७१ ॥

72. सर्वलक्ष्यविनिर्मुक्तः संनिरुद्धैकमानसः ।
एवं केवलमभ्यस्यन्विश्वमध्यक्षमीक्षते ॥ ७२ ॥

73. क्षान्त्यर्थं सर्वजन्तूनामिहामुत्र विरोधिनाम् ।
प्राङ् 'णमो अरहंताण' जप्त्वा मन्त्रं शतं द्विषि ॥ ७३ ॥

74. फलाशाष्टकसंश्लिष्टे वर्गाष्टकविभूषिते ।
दिग्दलप्रणवाक्रान्ते प्रतिपत्रं मुखाम्बुजे ॥ ७४ ॥

75. ॐ णमो अरहंताणमित्येकैकमथाक्षरम् ।
विन्यस्यैनं पुनर्मन्त्रं जपेत्सद्बोधसिद्धये ॥ ७५ ॥

76. वर्गाष्टकं समादाय कर्णिकायां निरन्तरम् ।
ह्रींकारं संस्मरन्योगी प्रोद्गलन्तं वियत्पदि ॥ ७६ ॥

77. प्रणवस्य युगाभ्यां प्राग् मायाया युगलेन च ।
पार्श्वयोर्युक्तमूर्धस्थन्यस्तहंसपदान्वितम् ॥ ७७ ॥

78. अनाहतसमाक्रान्तं श्रीकारं मूर्धवर्जितम् ।
ध्यायन्नेतां जपेद्विद्यां स विद्यान्याश्रिवाञ्छया ॥ ७८ ॥

79. जोग्गे[1] मग्गे तच्चे भूदे भव्वे भविस्से अक्खे पक्खे जिणपासे
स्वाहा । ॐ ह्रीं अर्हं णमो अरहंताणं ह्रीं नमः ।
मस्तके वदने कण्ठे हृदये नाभिमण्डले ।
ध्यायेच्चन्द्रकलाकारं योगी प्रत्येकमम्बुजम् ॥ ७९ ॥

---

१. जोगे मग्गे तच्चे भूये भवभविस्से अक्खे पक्खे जिणपासे ।

80. उद्यदादित्यबिम्बाभं प्रभासंभारभास्वरम् ।
शोषयन्तं महास्नेहं प्लुष्यन्तं कर्मपञ्जरम् ॥ ८० ॥
81. स्वमशेषितकर्माणं नयन्तं परमास्पदम् ।
विश्वतो व्यापकं ध्यायेदोङ्कारं नाभिवारिजे ॥ ८१ ॥
82. तथाभूतमदोंकारं मानसाम्भोजवासितम् ।
कण्ठकन्दलसंलीनमप्याकारं सरोजगम् ॥ ८२ ॥
83. शिरःसरोरुहारूढं सितवर्णं[1] शशिरोचिषम् ।
साकारं च मुखाम्भोजे हारनीहारपाण्डुरम् ॥ ८३ ॥
84. स्वसंवेगकृदन्यच्च यन्निर्वेगविधायकम् ।
पदमक्षरमेकं वा योगी ध्यायन्न नश्यति ॥ ८४ ॥
85. वीतरागो भवन्योगी यद्य किंचिद्विचिन्तयेत् ।
तदेव ध्यानमाम्नातमतोऽन्ये ग्रन्थविस्तराः ॥ ८५ ॥
86. प्रमाणनयनिक्षेपैरात्मतत्त्वमवैति यः ।
स वेत्ति परमात्मानं परमात्मानमर्थतः ॥ ८६ ॥
87. त्रिकालविषयं साक्षाच्छक्तिव्यक्तिविवक्षया ।
सामान्येन नयेनैकं परमात्मानमर्थतः ॥ ८७ ॥
88. कल्याणातिशयैराढ्यो नवकेवललब्धिमान् ।
सभास्थितो जिनो ध्येयः प्रातिहार्यपरिष्कृतः ॥ ८८ ॥
89. सर्वलक्षणसंपूर्णं निर्मले मणिदर्पणे ।
संक्रान्तबिम्बसादृश्यं शान्तं संचिन्तयेद्विभुम् ॥ ८९ ॥
90. सर्वज्ञः सर्वदृक् सार्वो निर्मलो निष्कलोऽव्ययः ।
वीतरागः परो देवः[2] योगिनां योगिगोचरः ॥ ९० ॥
91. मूषागर्भे गताशेषमाक्षिकप्रतिमोऽभवेत् ।
यादृगाकारसंस्थानं तादृगाकृतिकं स्मरेत् ॥ ९१ ॥

---

१. सितवर्णं । २. श्रीवीतराग परोदे ।

92. अनन्यशरणस्तद्धि तत्संलीनैकमानसः ।
तद्गुणस्तत्स्वभावात्मा तत्तादात्म्यं स एव सन् ॥ ९२ ॥
93. योजयेत्तद्गुणग्रामैरात्मानं परमात्मना ।
तद्भावभावितो भव्यस्तत्स्वरूपमुपाश्नुते ॥ ९३ ॥
94. त्रिकालगोचरानन्तगुणपर्यायसंगतः ।
अनादिनिधनोऽमूर्तः संख्यातीतप्रदेशयुक् ॥ ९४ ॥
95. निष्कलः परमात्माहं लोकालोकावभासनः ।
विश्वव्यापिस्वभावस्थो विकारपरिवर्जितः ॥ ९५ ॥
96. इतीदृक्पुरुषाकारः[1] स्वाङ्गगर्भगतः स्फुरन् ।
सर्वदा परमात्मैव ध्येयः शुद्धः स्वभावभाक् ॥ ९६ ॥
97. एवं शुद्धनयालम्बी सर्वास्रवमशेषयेत् ।
महासंवरमभ्यास्ते कर्मकक्षं विनिर्दहेत् ॥ ९७ ॥
98. ध्यानस्यालम्बनीभूता धर्मस्य द्वादशापराः ।
अत्रैवानुगताः सम्यगनुप्रेक्षाश्च चिन्तयेत् ॥ ९८ ॥
99. अशाश्वतं शरीरादि कर्मबन्धनिबन्धनम् ।
जीवसंबन्धमन्यच्चज्ञानदर्शनसंपदः ॥ ९९ ॥
100. मृत्युव्याघ्रसमाघ्रातं संसारारण्यवर्तिनम् ।
जीवैणीशावकं पातुं नान्योऽलं जिनशासनात् ॥ १०० ॥
101. कर्मपोतं समारुह्य दुःखभाण्डभरो नरः ।
संकल्पश्वसनैर्नूनं बम्भ्रमीति भवोदधौ ॥ १०१ ॥
102. उन्मज्जन्विनिमज्जन्वा संसारासारसागरे ।
दुर्मोहान्धो[2] भ्रमत्येको दुःखैर्वानलदीपितः ॥ १०२ ॥
103. अन्योऽहं देहतोऽमुष्माद्बन्धं प्रत्यैक्यवानपि ।
स्वलक्षणविवक्षायाः स्वर्णादिकलिकादिवत् ॥ १०३ ॥

---

१. इति पुरुषाकारः । २. दुर्मोदान्धो ।

104. शरीरं बिभ्रतः शश्वदशौचं बीजदोषतः ।
स्वतुल्यात्कारणान्नित्यं कार्यमुत्पद्यते यतः ॥ १०४ ॥
105. योगरन्ध्रैरबुद्धात्मा कर्मवारि निरन्तरम् ।
आत्मपोतः समादत्ते पर्यटन्भववारिधौ ॥ १०५ ॥
106. सद्दृष्टिः सद्धनुर्धीरः संवरायसवर्मकः[1] ।
साधुयोधः सदाभेद्यः [ यदि न ] स्यादसंयमः[2] ॥ १०६ ॥
107. कषायकालिकाकर्ममललेपाद्विशुध्यति ।
जीवो हेमवदत्यन्तं तप्यमानस्तपोऽग्निना ॥ १०७ ॥
108. उत्पद्यते विपद्येत लोकोऽदुम्बरमध्यगा ।
क्रिमिराशिरिवासातसंतप्ता जन्तुसंततिः ॥ १०८ ॥
109. मानुष्यं कर्मभूर्योग्या सद्देशः कल्पता कुलम् ।
सत्यपीत्यादि दुष्प्रापे बोधिरत्नं सुदुर्लभम् ॥ १०९ ॥
110. इहैवोपशमात्सौख्यं न देवेषु परत्र च ।
आनन्दादक्षयं मोक्षे धर्मरत्नादवाप्यते ॥ ११० ॥
111. एताभिर्भावनाभिः स्वं भावयन्भव्यपुंगवः ।
निर्विण्णात्मातिसंविग्नो ध्याने दार्ढ्यं समश्नुते ॥ १११ ॥
112. निष्प्रकम्पशिखो दीपस्तमो यद्वन्निरस्यति ।
पापान्धतमसं हन्ति तद्वद्ध्यानं सुनिश्चलम् ॥ ११२ ॥
113. क्षुत्तृष्णोष्मादिभिर्दुःखैर्विषयैर्वा प्रकम्पते ।
निसर्गतरलं चित्तं वायुना शीर्णपर्णवत् ॥ ११३ ॥
114. धर्तुं मनो न शक्नोति मुनिरल्पबलो यदा ।
निर्वीर्यकन्धसंबन्धं केवलं कुरुते तदा ॥ ११४ ॥
115. वज्रकायं परिप्राप्य योगमारभते यदा ।
नियन्तुं शक्नुयाद्योगी तदा चित्तं सुनिश्चलम् ॥ ११५ ॥

---

१. संवरायवर्मकः, २. सदाभेद्यः स्यादसंयमः,

116. छिन्ने भिन्ने हृते दग्धे देहे स्वमिव दूरगम् ।
प्रपश्यन्वर्षवातादि दुःखैरपि न कम्प्यते ॥ ११६ ॥
117. न पश्यति तदा किंचिन्न शृणोति न जिघ्रति ।
स्पृष्टं किंचिन्न जानाति साक्षान्निर्वृत्तलेप्यवत् ॥ ११७ ॥
118. सम्यग्दृष्टयाद्यसंख्येयगुणनिर्जरणोद्गमात् ।
लब्धात्मलाभसद्ध्यानबलादेव विनिर्दहन् ॥ ११८ ॥
119. असंख्येयगुणं कर्म शमकोऽप्यानुषङ्गिकम् ।
ज्ञानाद्यैश्वर्यमाप्नोति फलं चोपशमात्सुखम् ॥ ११९ ॥
120. परलोके पुनः स्वर्गसागरे पतितः पुमान् ।
प्रोद्यत्संपूर्णपूर्णेन्दुवर्धमानोरुसंपदि ॥ १२० ॥
121. अणिमादिगुणानर्घ्यमाणिक्यगुणसंकुले ।
कालं गतं न जानाति भुञ्जानस्तत्सुखामृतम् ॥ १२१ ॥
122. ततश्च्युत्वावनौ भुक्त्वा तीर्थनाथादिसंपदः ।
शुक्लध्यानामृतं पीत्वा यात्यजामरणं पदम् ॥ १२२ ॥
123. धर्मध्यानमतिक्रान्तो यदा योगी भवेत्तदा ।
शुक्लध्यानं पुनर्ध्यातुमारभेत समाहितः ॥ १२३ ॥
124. सवितर्कं सवीचारं सपृथक्त्वमुदाहृतम् ।
शुक्लमाद्यं द्वितीयं च विपरीतं वितर्कयुत् ॥ १२४ ॥
125. सूक्ष्मक्रियाप्रतीपाति तृतीयं यदपाति तत् ।
समुच्छिन्नक्रियं तूर्यं ध्वस्तबन्धनिबन्धनम् ॥ १२५ ॥
126. त्र्येकयोगवपुर्योगा योगिनां तदनुक्रमात् ।
परे केवलिनः शुक्ले पूर्वे पूर्वविदः स्मृते ॥ १२६ ॥
127. एकाश्रये सवीचारे सवितर्के द्वितीयकम् ।
अवीचारं च वीचारो योगवागर्थसंक्रमः ॥ १२७ ॥
128. वितर्कः श्रुतमित्याहुर्यस्मादर्थान्पृथक् पृथक् ।
ध्यायत्यागममालम्ब्य पृथक्त्वं तेन तद्विदुः ॥ १२८ ॥

129. अर्थादर्थं वचः शब्दाद्योगाद्योगं समाश्रयन् ।
पर्यायादपि पर्यायं द्रव्याणोश्चिन्तयेदणुम् ॥ १२९ ॥

130. एवं शान्तकषायात्मा कर्मकक्षाशुशुक्षणिः ।
एकत्वध्यानयोग्यः स्यात्पृथक्त्वोत्तेजिताशयः ॥ १३० ॥

131. एकं द्रव्यमथाणुं वा पर्यायं चिन्तयेद्यतिः ।
योगेनैकेन यत्क्षीणस्तदेकत्वमुदीरितम् ॥ १३१ ॥

132. शुक्लध्यानानलेनैव दग्ध्वा घातीन्धनोत्करम् ।
तदार्हन्त्यमनुप्राप्य भाति भव्याब्जभास्करः ॥ १३२ ॥

133. धर्मामृतप्रवर्षेण प्रीणयन्भव्यचातकान् ।
पर्यटत्यपविघ्नौघो जिनध्यानधरां धराम्[1] ॥ १३३ ॥

134. येषामायुःसमानि स्युर्नामगोत्रे च वेद्यकम् ।
अकृत्वा ते समुद्घातं जिनाः शैलेश्यमियति ॥ १३४ ॥

135. कृत्वान्ये योगसंरोधं कुर्युरन्ते तु योगिनः ।
स्युस्सूक्ष्मक्रियायोगेन वीतयोगा विबन्धनाः ॥ १३५ ॥

136. समुच्छिन्नक्रियेणाथ हत्वा घातिबलं बलात् ।
साधितात्मस्वभावास्ते प्रयान्ति पदमव्ययम् ॥ १३६ ॥

137. मोक्षलक्ष्मीसमाश्लिष्टा विशिष्टगुणभूषणाः ।
शीलमालानिरौपम्या भुवनेश्वरवन्दिताः ॥ १३७ ॥

138. तत्र त्रैलोक्यसाम्राज्यश्रियमात्यन्तिकीं पराम् ।
सेवमाना निराबाधमनन्तं कालमासते ॥ १३८ ॥

139. सच्चरित्रतरुः सम्यग्यः पूर्वमभिवर्धितः ।
सद्ध्यानामृतसंसेकैस्तत्फलं भुञ्जते शिवम् ॥ १३९ ॥

1. जिनध्यरादरोदराम् ।

140. महामोहव्रहन्मीनं[1] दुःखवाडववह्निकम् ।
ध्याननावा समुत्तीर्णाः संसारापारसागरम् ॥ १४० ॥

141. आत्यन्तिकसुखावासनिराबाधजनान्वितम्[2] ।
नानागुणमणिव्रातनिर्वाणद्वीपमाश्रितः ॥ १४१ ॥

142. आत्माधीननिराबाधनिरौपम्यस्वभावजम् ।
निर्द्वन्द्वातीन्द्रियानन्तसौख्यसागरवर्तिनः ॥ १४२ ॥

143. को नाम वर्णयेत्तेषां स्वरूपं परमात्मनाम् ।
ज्ञानात्मनामचिन्त्यानां सर्वज्ञज्ञानगोचरम् ॥ १४३ ॥

144. गन्तुमन्तो न शक्येत यद्वदाकाशकालयोः ।
ज्ञानदर्शनसौख्यादिगुणानां तद्वदात्मनाम् ॥ १४४ ॥

145. मन्दरोदधिचन्द्रार्कगगनादिगुणौघवत् ।
निष्ठितार्थसुखादीनामुपमानं न विद्यते ॥ १४५ ॥

146. एवं ध्यानबलाद्धीराः साधयन्त्युत्तमं पदम् ।
देवविद्याधराधीशां भुक्त्वा भोगपरंपराम् ॥ १४६ ॥

147. उत्तमः संयमो ध्यानं ध्यानमत्युत्तमं तपः ।
संवरः परमो ध्यानं ध्यानं सर्वार्थसाधनम् ॥ १४७ ॥

148. संयमाभरणोद्भासिगुरुभक्तिपरायणः ।
संसारसागरोत्तीर्णः प्रयाति परमं पदम् ॥ १४८ ॥

149. उक्तः संक्षेपतो ध्यानविधिः किंचिद्यथामति ।
निःशेषमभिधातुं तत्केवलं केवली विभुः ॥ १४९ ॥

150. सम्यग्गुरूपदेशेन विनिश्चित्यादरादिमम् ।
समभ्यस्य प्रयत्नेन याति शान्तं पदं पुमान् ॥ १५० ॥

---

१. महामोहं वहन्मीजं । २. जनान्वितम् ।

151. अज्ञानाद्यन्मया बद्धमागमस्य विरोधकृत् ।
तत्सर्वमागमाभिज्ञाः शोधयन्तु विमत्सराः ॥ १५१ ॥

152. भद्रं भूतिभृतां भूरि भव्याम्भोजैकभास्वताम् ।
शासनाय जिनेशानामाज्ञापाशविपाशिने ॥ १५२ ॥

153. संयमोत्तमपीयूषपानसंशान्तदुःसहः ।
मोहहालाहलाग्निभ्यः श्रीगुरुभ्यो नमो नमः ॥ १५३ ॥

154. त्रैलोक्यसाररत्नाय मोक्षलक्ष्मीविधायिने ।
संसारोत्तारिणे नित्यं नमः संयमसेतवे ॥ १५४ ॥

155. तीर्थेशाश्चक्रनाथाः खचरहलधरा यं गणेन्द्रा मुनीन्द्राः
ध्यानाब्धिं संविगाह्य प्रचुरगुणमणिव्रातमव्यग्रदेशम् ।
याता यास्यन्ति यान्ति प्रवरशिवसुधादानभूभोगतृप्ताः
दासस्य श्रीगुरोर्मे शमसुखकृदसौ मानसे स्यात्सदैव ॥ १५५ ॥

156. विपुलवाङ्मयवारिधितत्त्वसन्मणिमयूखलवांशकलाकृतेः ।
स्मरणमात्रमिदं गदितं मया किमिह दृष्टमहो न महात्मभिः ॥१५६॥

157. ध्यानोपदेशकोशोऽयं सरस्वत्या यदर्पितः ।
भव्यैरादीयमानोऽपि सर्वदास्त्वक्षयस्थितिः ॥ १५७ ॥

158. श्रीनन्दनन्दिवत्सः श्रीनन्दीगुरुपदाब्जषट्चरणः ।
श्रीगुरुदासो नन्द्यान्मुग्धमतिश्रीसरस्वतीसूनुः ॥ १५८ ॥

इति श्रीयोगसारसङ्ग्रहम् [ हः ] ।

# श्लोकानुक्रमणिका


| | | | |
|---|---|---|---|
| अकारं परमं बीजं | ६६ | उद्यदादित्यबिम्बाभं | ८० |
| अज्ञानाद्यन्मया बद्ध- | १५१ | उत्पद्यते विपद्येत | १०८ |
| अणिमादिगुणानर्घ्य- | १२१ | उत्सृजन्मन्दमुच्छ्वासं | ५५ |
| अध्यात्मजं निराबाध- | १७ | उन्मज्जन्विनिमज्जना | १०२ |
| अनन्यशरणस्तद्धि | ९२ | एकचिन्तानिरोधो यः | ३४ |
| अनाहतसमाक्रान्तं | ७८ | एकाश्रये सवीचारे | १२७ |
| अन्योऽहं देहतोऽमुष्मात् | १०३ | एकं द्रव्यमथाणुं वा | १३१ |
| अर्थादर्थं वचः शब्दात् | १२९ | एताभिर्भावनाभिः स्वं | १११ |
| अशाश्वतं शरीरादि- | ९९ | एतामास्थां समास्थाय | ४८ |
| अष्टोत्तरशतं पूर्णं | ६४ | एवं ध्यानबलाद्धीराः | १४६ |
| असंख्येयगुणं कर्म | ११९ | एवं शान्तकषायात्मा | १३० |
| अ सि आ उ सा बीजानि | ६८ | एवं शुद्धनयालम्बि- | ९७ |
| आज्ञापायविपाकानां | ५६ | ॐ णमो अरहंताण- | ७५ |
| आत्मादिननिराबाध- | १४२ | कर्मजं भावमुत्सृज्य | ४७ |
| आत्यन्तिकसुखावास- | १४१ | कर्मपोतं समारुह्य | १०१ |
| आत्यन्तिकस्वभोत्था | २१ | कर्मारणिसमुद्भूत- | ९ |
| आर्तं रौद्रं विदुर्धर्म्यं | ३७ | कल्याणातिशयैराढ्यो | ८८ |
| इतीदृक्पुरुषाकारः | ९६ | कषायकालिकाकर्म- | १०७ |
| इहातः परलोके च | २८ | कषायैरिन्द्रियैर्दुष्टैः | १२ |
| इहैवोपशमात्सौख्यं | ११० | कष्टं कर्माष्टकं प्राप्य | ५९ |
| उक्तः संक्षेपतो ध्यान- | १४९ | कालानलमहाज्वाला- | १० |
| उत्तमः संयमो ध्यानं | १४७ | कृत्वान्ये योगसंरोधं | १३५ |

| | | | |
|---|---|---|---|
| को नाम वर्णयेत्तेषां | १४३ | धर्तुं मनो न शक्नोति | ११४ |
| क्षान्त्यर्थं सर्वजन्तूना- | ७३ | धर्मध्यानमतिक्रान्तो | १२३ |
| क्षीरवारिधिमध्यस्थं | ६२ | धर्मामृतप्रवर्षेण | १३३ |
| क्षुत्तृष्णोष्मादिभिर्दुःखैः | ११३ | ध्याता ध्यानं तथा ध्येयं | ३६ |
| गन्तुमन्तो न शक्येत | १४४ | ध्यानस्यालम्बनीभूता | ९८ |
| गेहवासे कुतः सौख्य- | १५ | ध्यानोपदेशकोशोऽयं | १५७ |
| चिन्तायत्तो व्रजेज्जीवः | २९ | ध्यायंस्त्रयोदशीं मात्रां | ७१ |
| छद्मस्थानमिदं ध्यानं | ३५ | ध्येयं वस्तु द्विधा तत्र | ६१ |
| छिन्ने भिन्ने हृते दग्धे | ११६ | न दुःखं न सुखं किंचित् | २५ |
| जानन्नपि न जानाति | २२ | न पश्यति तदा किंचित् | ११७ |
| जीवाजीवादिभिर्भावैः | ६० | न वेत्ति किं करोमीति | २३ |
| जोग्गो मग्गो तं वे | ७९ | नाहं देवो मनुष्यो वा | ४६ |
| ततश्च्युत्वावनौ भुक्त्वा | १२२ | निष्कलः परमात्माहं | ९५ |
| तत्र त्रैलोक्यसाम्राज्य- | १३८ | निष्प्रकम्पशिखो दीपः | ११२ |
| तथाभूतमदोकारं | ८२ | परलोके पुनः स्वर्ग- | १२० |
| तदुद्भवमजानानो | २० | पर्यङ्कदेशमध्यस्थः | ५३ |
| तस्मान्मनोनिरोधाय | ३१ | प्रणवस्य युगाभ्यां प्राक् | ७७ |
| तस्यैवादिनमस्कार- | ६७ | प्रमाणनयनिक्षेपैः | ८६ |
| तावदेव सुखी जीवो | २४ | फलाशाष्टकसंश्लिष्टे | ७४ |
| तीर्थेशाश्चक्रनाथाः | १५५ | फलं तिर्यग्गतिस्तस्य | ४१ |
| त्रिकालगोचरानन्त- | ५७ | बोधशुद्धान्तरात्मानः | ११ |
| त्रिकालगोचरानन्त- | ९४ | बन्धहेतून् कदापास्य | ५८ |
| त्रिकालविषयं साक्षात् | ८७ | भद्रं भूतिभृतां भूरि | १५२ |
| त्रैकयोगवपुर्योगा- | १२६ | भद्रं भूरि भवाम्भोधि- | १ |
| त्रैलोक्यसाररत्नाय | १५४ | मधुरोऽम्लः कटुस्तिक्तः | ४५ |
| दुःखितः सुखिनं पश्यन् | २६ | मनसा वपुषा वाचा | ४४ |

| | | | |
|---|---|---|---|
| मनोरोधे भवेद्रुद्धं | ३० | वैराग्यं दशधा धर्मो | ६ |
| मस्तके वदने कण्ठे | ७९ | शरणोत्तममाकल्य- | ६९ |
| महामोहवृहन्मीनं | १४० | शरीरं विश्वतः | १०४ |
| मानुष्यं कर्मभूर्योग्या | १०९ | शिरःसरोरुहारूढ- | ८३ |
| मूर्ध्नेन्दुमुक्तपीयूष- | ६३ | शुक्लध्यानानलेनैव | १३२ |
| मूषागर्भे गताद्योत- | ९१ | शून्यवेश्मगिरीन्द्रोरु- | ५० |
| मृत्युव्याघ्रसमाघ्रातं | १०० | श्रीनन्दनन्दिवत्सः | १५८ |
| मोक्षलक्ष्मीसमाश्लिष्टा | १३७ | षोडशाक्षरविद्यायां | ६५ |
| मन्दरोदधिचन्द्रार्क- | १४५ | सच्चरित्रतरुः सम्यक् | १३९ |
| यस्माद् ध्यानं बुधैरिष्टं | ५ | सत्संयमधरो धीरः | ४९ |
| यः प्रमत्ताप्रमत्ताख्यः | ५२ | सद्दृष्टिः सद्धनुर्धीरः | १०६ |
| येषामायुःसमानि | १३४ | सद्बोधवार्धिनिर्धौत- | ५१ |
| योगरन्ध्रैरबुद्धात्मा | १०५ | सद्वाग्मृतपदन्यास- | ४ |
| योगीन्द्रो रुन्द्रयोगाग्नि- | ३ | समाहृत्येन्द्रियग्राम- | ५४ |
| योजयेत्तद्गुणग्रामैः | ९३ | समुच्छिन्नक्रियेणाथ | १३६ |
| रागद्वेषान्ममत्वाद्वा | ४३ | सम्यग्गुरूपदेशेन | १५० |
| रागान्धबुद्धयो जीवाः | १९ | सम्यग्दृष्ट्याद्यसंक्लेशा | ११८ |
| ललाटपट्टसंश्लिष्टां | ७० | सर्वज्ञः सर्वदृक्सार्वो | ९० |
| वज्रकायं परिप्राप्य | ११५ | सर्वलक्षणसंपूर्णं | ८९ |
| वर्गाष्टकं समादाय | ७६ | सर्वलक्षणविनिर्मुक्तः | ७२ |
| वह्निना चेत् प्रवाल्येत | १३ | सर्वज्ञोपशमाप्यापि | ७ |
| वितर्कः श्रुतमित्याहुः | १२८ | सर्वसारं दुरावापं | ८ |
| विपुलवाङ्मयवारिधि- | १५६ | सर्वसंगविमुक्तानां | १६ |
| विषयामिषसेवायाः | १८ | सवितर्कं सवीचारं | १२४ |
| विषादामर्षशान्त्यादि- | ३८ | साम्यमेवादराद्भाव्यं | ३२ |
| वीतरागो भवन्योगी | ८५ | साम्यादपि महाध्येद | ३३ |

| | | | |
|---|---|---|---|
| सूक्ष्मक्रियाप्रतीपाति | १२५ | संसारभीरुभिस्तस्मात् | २४ |
| संकल्पोऽपि च जन्तूना | २७ | स्याद्द्वितीयस्तृतीयश्च | ४० |
| संयमामरणोद्भासि- | १४८ | स्वमशेषितकर्माणं | ८१ |
| संशमोद्धाममाराम- | २ | स्वसंवेगकृदन्याच्च | ८४ |
| संयोगे युधिनिष्ठस्य | ३९ | हिंसायामनृते स्तेये | ४२ |
| संयमोत्तमपीयूष- | १५३ | | |

## MĀṆIKACHANDRA D. J. GRANTHAMĀLĀ

* The Serial Numbers marked with asterisk are out of print.

*1. **Laghīyastraya-ādi-saṁgrahaḥ**: This vol. contains four small works: 1) *Laghīyastrayam* of Akalaṅkadeva (*c.* 7th century A. D.), a small Prakaraṇa dealing with *pramāṇa*, *naya* and *pravacana*. Akalaṅka is an eminent logician who deserves to be remembered along with Dharmakīrti and others. His works are very important for a student of Indian logic. Here the text is presented with the Sk. commentary of Abhayacandrasūri. 2) *Svarūpasaṁbodhana* attributed to Akalaṅka, a short yet brilliant exposition of *ātman* in 25 verses. 3-4) *Laghu-Sarvajña-siddhiḥ* and *Bṛhat-Sarvajña-siddhiḥ* of Anantakīrti. These two texts discuss the Jaina doctrine of Sarvajñatā. Edited with some introductory notes in Sk. on Akalaṅka, Abhayacandra and Anantakīrti by Pt. KALLAPPA BHARAMAPPA NITAVE, Bombay Saṁvata 1972, Crown pp. 8-204, Price As. 6/-.

*2. **Sāgāra-dharmāmṛtam** of Āśādhara: Āśādhara is a voluminous writer of the 13th century A. D., with many Sanskrit works on different subjects to his credit. This is the first part of his *Dharmāmṛta* with his own commentary in Sk. dealing with the duties of a layman. Pt. NATHURAM PREMI adds an introductory note on

Āśādhara and his works. Ed. by Pt. MANOHARLAL, Bombay Saṁvat 1972, Crown pp. 8-246, Price As. 8/-.

*3. **Vikrāntakauravam** or **Sulocanānāṭakam** of Hastimalla (A.D. 13th century): A Sanskrit drama in six acts. Ed. with an introductory note on Hastimalla and his works by Pt. MANOHARLAL, Bombay Saṁvat 1972, Crown pp. 4-164, Price As. 6/-.

*4. **Pārśvanātha-caritam** of Vādirājasūri: Vādirāja was an eminent poet and logician of the 10th century A. D. This is a biography of the 23rd Tīrthaṅkara in Sanskrit extending over 12 cantos. Edited with an introductory note on Vādirāja and his works by Pt. MANOHARLAL, Bombay Saṁvat 1973, Crown pp. 18-198, Price As. 8/-.

*5. **Maithilīkalyāṇam** or **Sītānāṭakam** of Hastimalla: A Sk. drama in 5 acts, see No. 3 above. Ed. with an introductory note on Hastimalla and his works by Pt. MANOHARLAL, Bombay Saṁvat 1973, Crown pp. 4-96, Price As. 4/-.

*6. **Ārādhanāsāra** of Devasena: A Prākrit work dealing with religio-didactic topics. Prākrit text with the Sk. commentary of Ratnakīrtideva, edited by Pt. MANOHARLAL, Bombay Saṁvat 1973, Crown pp. 128, Price As. 4/6.

*7. **Jinadattacaritam** of Guṇabhadra: A Sk. poem in 9 cantos dealing with the life of Jinadatta, edited by Pt. MANOHARLAL, Bambay saṁvat 1973, Crown pp. 96, Price As. 5/-.

8. **Pradyumnacarita** of Mahāsenācārya: A Sk. poem in 14 cantos dealing with the life of Pradyumna. It is composed in a dignified style. Edited by Pts. MANOHARLAL and RAMAPRASAD, Bombay Saṁvat 1973, Crown pp. 230, Price As. 8/-.

9. **Cāritrasāra** of Cāmuṇḍarāya: It deals with the rules of conduct for a house-holder and a monk. Edited by Pt. INDRALAL and UDAYALAL, Bombay Saṁvat 1974, Crown pp. 103, Price As. 6/-.

*10. **Pramāṇanirṇaya** of Vādirāja: A manual of logic discussing specially the nature of Pramāṇas. Edited by Pts. INDRALAL and KHUBCHAND, Bombay Saṁvat 1974, Crown pp. 80, Price As. 5/-.

* 11. **Ācārasāra** of Vīranandi: A Sk. text dealing with Darśana, Jñāna etc. Edited by Pts. INDRALAL and MANOHARLAL, Bombay Saṁvat 1974, Crown pp. 2-98, Price As. 6/-.

* 12. **Trilokasāra** of Nemichandra: An important Prākrit text on Jaina cosmography published here with the Sk. commentary of Mādhavacandra. Pt. PREMI has written a critical note on Nemicandra and Mādhavacandra in the Introduction. Edited with an index of Gāthās by Pt. MANOHARLAL, Bombay Saṁvat 1975, Crown pp. 10-405-20, Price Rs. 1/12/-.

* 13. **Tattvānuśāsana-ādi-saṁgrahaḥ**: This vol. contains the following works. 1) *Tattvānuśāsana* of Nāgasena. 2) *Iṣṭopadeśa* of Pūjyapāda with the Sk.

commentary of Āśādhara. 3) *Nītisāra* of Indranandi. 4) *Mokṣapañcāśikā.* 5) *Śrutāvatāra* of Indranandi. 6) *Adhyātmataraṅgiṇī* of Somadeva. 7) *Bṛhat-pañca-namaskāra* or *Pātrakesarī-stotra* of Pātrakesarī with a Sk. commentary. 8) *Adhyātmāṣṭaka* of Vādirāja. 9) *Dvā-trimśikā* of Amitagati. 10) *Vairāgyamaṇimālā* of Śrīcandra. 11) *Tattvasāra* (in Prākrit) of Devasena. 12) *Śrutaskandha* (in Prākrit) of Brahma Hemacandra. 13) *Ḍhāḍasī-gāthā* in Prākrit with Sk. chāyā. 14) *Jñā-nasāra* of Padmasiṁha, Prākrit text and Sk. chāyā. Pt. PREMI has added short critical notes on these authors and their works. Edited by Pt. MANOHARLAL, Bombay Saṁvat 1975, Crown pp. 4-176, Price As. 14/-.

* 14. **Anagāra-dharmāmṛta** of Āśādhara : Second part of the *Dharmāmṛta* dealing with the rules about the life of a monk. Text and author's own commentary. Edited with verse and quotation Indices by Pts. BANSIDHAR and MANOHARLAL, Bombay Saṁvat 1976, Crown pp. 692-35, Price Rs. 3/8/-.

*15. **Yuktyanuśāsana** of Samantabhadra : A logical Stotra which has weilded great influence on later authors like Siddhasena, Hemacandra etc.. Text published with an equally important commentary of Vidyānanda. There is an introductory note on Vidyānanda by Pt. PREMI. Ed. by Pts. INDRALAL and SHRILAL, Bombay Saṁvat 1977, Crown pp. 6-182, Price As. 13/-.

*16. **Nayacakra-ādi-saṁgraha** : This vol. contains the following texts. 1) *Laghu-Nayacakra* of Devasena, Prākrit text with Sk. chāyā. 2) *Nayacakra* of Devasena, Prākrit text and Sk. chāyā. 3) *Ālāpapaddhati* of Devasena. There is an introductory note in Hindī on Devasena and his *Nayacakra* by Pt. PREMI. Edited by Pt. BANSIDHARA with Indices, Bombay Saṁvat 1977, Crown pp. 42-148. Price As. 15/-.

*17. **Ṣaṭprābhṛtādi-saṁgraha** : This vol. contains the following Prākrit works of Kundakunda of venerable authority and antiquity. 1) *Darśana-prābhṛta*, 2) *Cāritra-prābhṛta*, 3) *Sūtra-prābhṛta*, 4) *Bodha-prābhṛta*, 5) *Bhāva-prābhṛta*, 6) *Mokṣa-prābhṛta*, 7) *Liṅga-prābhṛta*, 8) *Śīla-prābhṛta*, 9) *Rayaṇasāra* and 10) *Dvādaśānuprekṣā*. The first six are published with the Sk. commentary of Śrutasāgara and the last four with the Sk. chāyā only. There is an introduction in Hindī by Pt. PREMI who adds some critical information about Kundakunda, Śrutasāgara and their works. Edited with an Index of verses etc. by Pt. PANNALAL SONI, Bombay Saṁvat 1977, Crown pp. 12-442-32. Price Rs. 3/-.

*18. **Prāyaścittādi-saṁgraha** : The following texts are included in this volume. 1) *Chedapiṇḍa* of Indranandi Yogīndra, Prākrit text and Sk. chāyā. 2) *Chedaśāstra* or *Chedanavati*, Prākrit text and Sk. chāyā and notes. 3) *Prāyaścitta-cūlikā* of Gurudāsa, Sk. text with the commentary of Nandiguru. 4) *Prāyaścittagrantha* in Sk. verses by Bhaṭṭākalaṅka. There is a critical

introductory note in Hindī by Pt. PREMI. Edited by Pt. PANNALAL SONI, Bombay Saṁvat 1978, Crown pp.16-172-12, Price Rs. 1/2/-.

*19. **Mūlācāra** of Vaṭṭakera, part I: An ancient Prākrit text in Jaina Śaurasenī, Published with Sk. chāyā and Vasunandi's Sk. commentary. A highly valuable text for students of Prākrit and ancient Indian monastic life. Edited by Pts. PANNALAL, GAJADHARALAL and SHRILAL, Bombay Saṁvat 1977, Crown pp. 516, Price Rs- 2/4/-.

20. **Bhāvasaṁgraha-ādiḥ**: This vol. contains the following works. 1) *Bhāvasaṁgraha* of Devasena, Prākrit text and Sk. chāyā. 2) *Bhāvasaṁgraha* in Sk. verse of Vāmadeva Paṇḍita. 3) *Bhāva-tribhaṅgī* or *Bhāvasaṁgraha* of Śrutamuni, Prākrit text and Sk. chāyā. 4) *Āsravatribhaṅgī* of Śrutamuni, Prākrit text and Sk. chāyā. There is a Hindī Introduction with critical remarks on these texts by Pt. PREMI. Edited with an Index of verses by Pt. PANNALAL SONI, Bombay Saṁvat 1978, Crown pp. 8-284-28, Price Rs. 2/4/-

21. **Siddhāntasāra-ādi-Saṁgraha**: This vol. contains some twentyfive texts. 1) *Siddhāntasāra* of Jinacandra, Prākrit text, Sk. chāyā and the commentary of Jñānabhūṣaṇa. 2) *Yogasāra* of Yogicandra, Apabhraṁśa text with Sk. chāyā. 3) *Kallāṇāloyaṇā* of Ajitabrahma, Prākrit text with Sk. chāyā, 4) *Amṛtāśīti* of Yogīndradeva, a didactic work in Sanskrit. 5) *Ratna-*

*mālā* of Śivakoṭi. 6) *Śāstrasārasamuccaya* of Māghanandi, a Sūtra work divided in four lessons. 7) *Arhatpravacanam* of Prabhācandra, a Sūtra work in five lessons. 8) *Āptasvarūpam*, a discourse on the nature of divinity. 9) *Jñānalocanastotra* of Vādirāja (Pomarājasuta). 10) *Samavasaraṇastotra* of Viṣṇusena. 11) *Sarvajñastavana* of Jayānandasūri. 12) *Pārśvanāthasamasyā-stotra*. 13) *Citrabandhastotra* of Guṇabhadra. 14) *Maharṣi-stotra* (of Āśādhara). 15) *Pārśvanāthastotra* or *Lakṣmīstotra* with Sk. commentary. 16) *Neminātha-stotra* in which are used only two letters viz. *n* & *m*. 17) *Śaṅkhadevāṣṭaka* of Bhānukīrti. 18) *Nijātmāṣṭaka* of Yogīndradeva in Prākrit. 19) *Tattvabhāvana* or *Sāmāyika-pāṭha* of Amitagati. 20) *Dharmarasāyaṇa* of Padmanandi, Prākrit text and Sk. chāyā. 21) *Sārasamuccaya* of Kulabhadra. 22) *Aṁgapaṇṇatti* of Śubhacandra, Prākrit text and Sk. chāyā. 23) *Śrutāvatāra* of Vibudha Śrīdhara. 24) *Śalākāniksepaṇaniṣkāsana-vivaraṇam*. 25) *Kalyāṇamālā* of Āśādhara. Pt. PREMI has added critical notes in the Introduction on some of these authors. Edited by Pt. PANNALAL SONI, Bombay Saṁvat 1979 Crown pp. 32-324, Price Rs. 1/8/-.

*22. **Nītivākyāmṛtam** of Somadeva : An important text on Indian Polity, next only to *Kauṭilya-Arthaśāstra*. The Sūtras are published here along with a Sanskrit commentary. There is a critical Introduction by PREMI comparing this work with Arthaśāstra. Edited by

Pt. PANNALAL SONI, Bombay Saṁvat 1979, Crown pp. 34-426, Price Rs. 1/12/-.

* 23. **Mūlācāra** of Vaṭṭakera, part II : Prākrit text, Sk. chāyā and the commentary of Vasunandi, see No. 19 above. Bombay Saṁvat 1980, Crown pp. 332, Price Rs. 1/8/-

24. **Ratnakaraṇḍaka-śrāvakācāra** of Samantabhadra : With the Sanskrit commentary of Prabhācandra. There is an exhaustive Hindī Introduction by Pt. JUGAL KISHORE MUKTHAR, extending over more than pp. 300, dealing with the various topics about Samantabhadra and his works. Bombay Saṁvat 1982, Crown pp. 2-84-252-114, Price Rs. 2/-.

25. **Pañcasaṁgrahaḥ** of Amitagati : A good compendium in Sanskrit of the contents of *Gōmmaṭasāra.* Edited with a note on the author and his works by Pt. DARBARILAL, Bombay 1927, Crown pp. 8-240, Price As. 13/- .

26. **Lāṭīsaṁhitā** of Rājamalla : It deals with the duties of a layman and its author was a contemporary of Akbar to whom references are found in his compositions. There is an exhaustive Introduction in Hindī by Pt. JUGALKISHORE. Edited by Pt. DARBARILAL, Bombay Saṁvat 1948, Crown pp. 24-136, Price As. 8/- .

27. **Purudevacampū** of Arhaddāsa : A Campū work in Sanskrit written in a high-flown style. Edited with notes by Pt. JINADASA, Bombay Saṁvat 1985, Crown p. 4-206, Price As. 12/- .

28. **Jaina-Śilālekha-saṁgraha:** It is a handy volume giving the Devanāgarī version of *Epigraphia Carnatica* II (Revised ed.) with Introduction, Indices etc. by Prof. HIRALAL JAIN, Bombay 1928, Crown pp. 16-164-428-40, Price Rs. 2/8/- .

29-30-31. **Padmacarita** of Raviṣeṇa: This is the Jaina recension of Rāma's story and as such indispensable to the students of Indian epic literature. It was finished in A. D. 676, and it has close similarities with *Paümcariu* of Vimala (beginning of the Christian era); Edited by Pt. DARBARILAL, Bombay Saṁvat 1985, vol. i, pp. 8-512; vol. ii, pp. 8-436; vol. iii, pp. 8-446. Thus pp. about 1400 in all. Price Rs. 4/8/- .

32-33. **Harivaṁśa-purāṇa** of Jinasena I: This is the Jaina recension of the Kṛṣṇa legend. These two volumes are very useful to those interested in Indian epics. It was composed in A.D. 783 by Jinasena of the Punnāṭa-saṁgha. There is a Hindī Introduction by Pt. PREMIJI. Edited by Pt. DARBARILAL, Bombay 1930, vol. i and ii pp. 48-12-806, Price Rs. 3/8/-.

34. **Nītivākyāmṛtam**, a supplement to No. 22 above: This gives the missing portion of the Sanskrit commentary, Bombay Saṁvat 1989, Crown pp. 4-76, Price As. 4/-.

35. **Jambūsvāmi-caritam** and **Adhyātma-kamala-mārtaṇḍa** of Rājamalla: See No. 26 above. Edited with an Introduction in Hindī by Pt. JAGADISH-

CHANDRA, M. A., Bombay Saṁvat 1993, Crown pp. 18-264-4, Price Rs. 1/8/-.

36. **Triṣaṣṭi-smṛti-śāstra** of Āśādhara: Sanskrit text and Marāṭhī rendering. Edited by Pt. MOTILAL HIRACHANDA, Bombay 1937, Crown pp. 2-8-166, Price As. 8/-.

37. **Mahāpurāṇa** of Puṣpadanta, Vol. I **Ādipurāṇa** (Saṁdhis 1-37): A Jaina Epic in Apabhraṁśa of the 10th century A.D. Apabhraṁśa Text, Variants, explanatory Notes of Prabhācandra. A model edition of an Apabhraṁśa text. Critically edited with an Introduction and Notes in English by Dr. P. L. VAIDYA, M. A., D.Litt., Bombay 1937, Royal 8vo pp. 42-672, Price Rs. 10/-.

37(a) Rāmāyaṇa portion separately issued. Price Rs. 2.50.

38. **Nyāyakumudacandra** of Prabhācandra Vol. I: This is an important Nyāya work, being an exhaustive commentary on Akalaṅka's *Laghīyastrayam* with Vivṛti (see No. 1 above). The text of the commentary is very ably edited with critical and comparative foot-notes by Pt. MAHENDRAKUMARA. There is a learned Hindī Introduction exhaustively dealing with Akalaṅka, Prabhācandra, their dates and works etc. written by Pt. KAILASCHANDRA. A model edition of a Nyāya text. Bombay 1938, Royal 8 vo., pp. 20-126-38-402-6, Price Rs. 8/-.

39. **Nyāyakumudacandra** of Prabhācandra, Vol. II : See No 38 above. Edited by Pt. MAHENDRAKUMAR SHASTRI who has added an Introduction in Hindī dealing with the contents of the work and giving some details about the author. There is a Table of contents and twelve Appendices giving useful Indices. Bombay 1941. Royal 8vo pp. 20 + 94 + 403-930. Price Rs. 8/8/-.

40. **Varāṅgacaritam** of Jaṭā-Siṁhanandi : A rare Sanskrit Kāvya brought to light and edited with an exhaustive critical Introduction and Notes in English by Prof. A. N. Upadhye, M. A., Bombay 1938, Crown pp. 16+56+392, Price Rs. 3/-.

41. **Mahāpurāṇa** of Puṣpadanta, Vol. II (Saṁdhis 38-80) : See No. 37 above. The Apabhraṁśa Text critically edited to the variant Readings and Glosses, along with an Introduction and five Appendices by Dr. P. L. VAIDYA, M.A., D. Litt., Bombay 1940. Royal 8vo pp. 24+570 Price Rs. 10/-.

42. **Mahāpurāṇa** of Puṣpadanta, Vol. III (Saṁdhis 81-102) : See No. 37 and 40 above. The Apabhraṁśas Text critically edited with variant Readings and Glosses by Dr. P. L. VAIDYA, M. A., D. Litt. The Introduction covers a biography of Puṣpadanta, discussing all about his date, works, patrons and metropolis (Mānyakheṭa). Pt. PREMI'S essay 'Mahākavi Puṣpadanta' in Hindī is included here. Bombay 1941. Royal 8vo pp. 32+28+314. Price Rs. 6/-.

42(a). **Harivaṁśa** portion is separately issued. Price Rs. 2.50.

43. **Ajanāpavanaṁjaya-nāṭakam** and **Subhadrā-nāṭikā** of Hastimalla: Two Sanskrit Dramas of Hastimalla (see also No. 3 above). Critically edited by Prof. M. V. PATWARDHAN. The Introduction in English is a well documented essay on Hastimalla and his four plays which are fully studied. There is an Index of stanzas from all the four plays. Bombay 1950. Crown pp. 8+68+120+128. Pricc Rs. 3/-.

44. **Syādvādasiddhi** of Vādībhasiṁha: Edited by Pt. DARBARILAL with Introductions etc. in Hindī shedding good deal of light on the author and contents of the work.. Bombay 1950. Crown pp. 26+32+34+80. Price Rs. 1-50.

45. **Jaina Śilālekha-saṁgraha,** Part II (see No. 28 above): The texts of 302 Inscriptions (following A. Guérinot's order) are given in Devanāgarī with summary in Hindī. There is an Index of Proper Names at the end. Compiled by Pt. VIJAYAMURTI, M. A. Bombay 1952. Crown pp. 4+520. Price Rs. 8/-.

46. **Jaina Śilālekha-saṁgraha,** Part III (see Nos. 23 & 45 above): The texts of 303-846 inscriptions (following Guérinot's list) is given in Devanāgarī with summary in Hindī compiled by Pt. VIJAYAMURTI, M.A. There is an Index of Proper Names at the end. The Introduction by Shri G.C. CHAUDHARI is an exhaustive

study of inscriptions. Bombay 1957. Crown pp. 8+178+592+42. Price Rs. 10/-.

47. **Pramāṇaprameyakalikā** of Narendrasena (A. D. 18th century): A Nyāya text dealing with Pramāṇa and Prameya. The Sanskrit text critically edited by Pt. DARBARILAL. The Hindī Introduction deals with the author and a number of topics connected with the contents of this work. Bhāratiya Jñānapīṭha Kashi, Varanasi 1961. Price Rs. 1.50.

●

*For copies please write to—*

BHĀRATĪYA JÑĀNAPĪTHA

Durgakunda Road,

Varanasi—5 (India).

Or

BHĀRATĪYA JÑĀNAPĪTHA

3620/21 Netaji Subhash Marg,

Delhi—6 (India).

वीर सेवा मन्दिर
पुस्तकालय
काल नं०
लेखक उपाध्याय नेमिनाथ आदिनाथ
शीर्षक आराधनासमुच्चयं योगसारसंग्रह
खण्ड क्रम संख्या ४१६२
वापसी का